


परमाणुदर्शनम् — by पं॰ जगदीशाचार्य.
(बालार्क वेदमन्दिर Series No. 2),
~~सोनीपत~~ सोनीपत, 1969.

(6)

1244

बालार्क-वेदमन्दिरस्य द्वितीयं पुष्पम्

परमाणुदर्शनम्

चित्राचार्योपनामा जगदीशाचार्यः

बालार्क-वेदमन्दिरस्य द्वितीयं पुष्पम्

—ओ३म्—

परमाणु-दर्शनम्

चित्राचार्योपनाम्ना पण्डितजगदीशाचार्येण प्रणीतम्

प्रकाशक—

श्रीमती गायत्रीदेवी

अध्यक्षा—बालार्क-संस्कृत-अनुसन्धानाश्रम

वेदमन्दिर, महसी बाजार,

बहराइच (उ०प्र०)

मुद्रक—

श्री सुरेन्द्र कुमार कपूर

रामलाल कपूर ट्रस्ट प्रेस, सोनीपत


प्रथम वार १००० } चैत्र २०२६
मार्च १९६९

बालार्क-वेदमन्दिरस्य प्रकाशनानि

१–शिक्षा-शास्त्रम्	४-००	सजिल्द	५-००
२–परमाणु-दर्शनम्	५-००	,,	६-००
३–षट्कर्मचिकित्सा-शास्त्रम्	८-००	,,	९-५०
४–अरबी-शिक्षाशास्त्रम्	३-००	,,	४-००
५–परमाणुदर्शन (हिन्दी)	५-००	,,	६-००

पुस्तक-प्राप्ति-स्थानम्
श्रीमती गायत्रीदेवी
अध्यक्षा—बालार्क-संस्कृत-अनुसन्धानाश्रम
वेदमन्दिर, महसी बाजार,
बहराइच (उ०प्र०)

समर्पणम्



मीमांसाद्वयमानभानमहिमप्रख्याततितः स्वादृतः,

प्रोद्यद्वाक्यपदीयवाक्यविवृतेर्यो गीतभूरिस्तवः ।

येन द्वारमपावृतं सुपिहितं मे वेश्मनो ब्रह्मणस्

तस्मै श्रीरघुनाथशर्मगुरवे प्रीत्येदमुत्सृज्यते ॥

जगदीशः

कल्याण-कामना




निरीक्षितं मया श्री जगदीशाचार्यविरचितं परमाणुदर्शनं प्रारम्भतः समाप्तिपर्यन्तम् । पठितञ्चाक्षरशः सुरगिरा विलिखितं गायत्रीनामकं तद्भाष्यं समवलोकितञ्च मनोयोगेन । सरलः सुबोधश्चाऽऽर्यभाषयाऽनूदितस्तदनुवादः । समवलोक्यैतत्सर्वं प्रफुल्लितं मनः, समञ्चिता रोमावली, सन्तुष्टञ्चान्तःकरणम्, प्रसन्नश्च ब्रह्माऽपरपर्यायो मेऽन्तरात्मा ।

एतस्मिन् दर्शने सूत्ररचनाशैली तद्विन्यासपरम्परा च सुशोभना मनोहरा च वर्तत इत्यत एतदर्थं निःसरन्तितमां मन्मुखाद् दर्शनकाराय बलाद् बहव आशीर्वादाः स्वशिष्यत्वेन प्रशस्तिवादाश्च परम विदुषे, तद्वैदुष्यदर्शनेन, अभिनन्दनवादाश्चाऽभिनन्दनीयस्वविचारधाराया निर्भयतापूर्वकं यत्र तत्र सुविन्यसते ।

इत्यतो विश्वसिमि यदस्य परमाणुदर्शनाख्यस्य सुदर्शनीयस्य सुदर्शनस्य **षट्सु दर्शनेषु सप्तमी पदवी भविष्यति**, दार्शनिकेषु विद्वत्सु समादरः लोके च प्रचारः ।

मन्मते दर्शनकारः श्री जगदीशाचार्योऽयं गौतमकणादशङ्करबुद्धप्रभृतिदर्शनकारश्रेण्यां समुपवेष्टुं योग्योऽस्तीति । शम् ।

आयुर्वेदविश्वविद्यालयः, झांसी शुभेच्छु :
३०।६।६२ **लालचन्द्रो वैद्यः**




इदं परमाणुदर्शनं मया महताऽवधानेनादित आरभ्यान्तं यावन्निरीक्षितम् । अत्र खलु प्राचामर्वाचाञ्च प्राच्यानां पाश्चात्यानाञ्च दार्शनिकानां परमाणुपरीक्षणपद्धतिः समालोचिता समावेशिता च । कीदृशं परमाणूनां स्वरूपं, कथञ्च कार्योन्मुखानां तेषां निरवयवानामपि संयोग इत्यादयोऽप्रतिसमाधेया आक्षेपा अत्र समाहिताः । अत्र च परमाणुपरीक्षणप्रसङ्गेन प्राच्यदार्शनिकानामभिप्रेतं पदार्थानां पतनकारणं गुरुत्वं पाश्चात्यानाञ्चाभिप्रेता पदार्थेष्वाकर्षणशक्तिः पतनप्रतिबन्धिकी परीक्षिता । आकाशस्य च द्रव्यत्वं परिच्छिन्नत्वञ्च, चक्षुषश्चाप्राप्यकारित्वं, विषयाणाञ्च प्रतिबिम्बनेन चक्षुःप्राप्तिः, परमाणूनाञ्च प्रत्यक्षयोग्यरूपरसादिरहितत्वमित्यादयो विषयाः स्वोपपत्तिकं समर्थिताः । अत्र च प्रायेण प्राच्यानां दार्शनिकानां परीक्षणपद्धतिरेव समादृतोपबृंहिता च युक्तिभिः । मन्ये संस्कृतसाहित्यसंजीवनायैतादृशरचनाप्रयासः स्वोपज्ञ एव साम्प्रतं ग्रन्थकर्तुः । आशासे चावश्यमेवायं ग्रन्थो विविदिषुभिर्विनेयैर्विदितवेदितव्यैश्च विद्वद्भिः सोत्कण्ठं सस्पृहं सस्नेहं सापेक्षञ्च समादृतो भविष्यतीति ।

वाराणसेयसंस्कृतविश्वविद्यालयः । **रघुनाथशर्मा**

६-१-६३ **वेदान्तविभागाध्यक्षः**

प्रणेता



तथा ये च देशेषु सर्वेषु जाताः स्वकालानुसारं समुद्धर्तुं कामाः ।
महायोगिनः सर्वलोकोपकारा नतस्तानहं दर्शनारम्भकाले ॥१॥

ज्ञानमेतत्परं गुह्यं परमाणुविनिश्चयम् ।
गुरुज्ञानाम्बुधेर्नीत्वा जिज्ञासुभ्यः प्रकाश्यते ॥२॥
यथा द्विधाकृतैः पादैश्चतुर्भिश्चेष्टते वृषः ।
रोरूयमाणो निःशङ्को महारण्यमुपाश्रितः ॥३॥
तथेदमध्याययुगे विभक्तैः शास्त्रमुत्तमम् ।
पादैश्चतुर्भिश्चरति प्रकामं घोषयन्मतम् ॥४॥
गायत्रीत्यनुसूयेव जाया मे याऽस्ति सत्तमा ।
तन्नाम्नेदं कृतं महाभाष्यञ्च सप्तमे ॥५॥
कमलावती च नाम्ना शिक्षासंस्थासु विश्रुता ।
किन्तु गायत्रीति संज्ञा मे प्रिया वेदकीर्तनात् ॥६॥

विद्वच्चरणरेणु
जगदीशः

परमाणु-दर्शनम्

अथ

परमाणुदर्शनम्

अथ प्रथमे पादे प्रथमोऽध्यायः

अथातः परमाणुजिज्ञासा ॥१॥

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । जिज्ञासापदघटकस्य च सन्प्रत्ययस्य परमाणुज्ञानानुकूले विचारे लक्षणा । अतः शब्दो ऽत्र हेत्वर्थः । परमाणूनां विश्वसर्गविसर्गानुकूलशक्तिमत्त्वेन विश्वोपादानत्वादिबुद्धिस्थो हेतुरत्र । तथा च परमाणूनां विश्वोपादानत्वात् परमाणुज्ञानानुकूलो विचारः प्रारभ्यते, इति सूत्रार्थः ।

तत्तु पञ्चमहाभूतानामविनाशि तत्त्वम् ॥२॥

पृथिवीजलवह्निवाय्वाकाशानां महाभूतानामवयवविभागे क्रियमाणेऽपकर्षपर्यन्तं यदविनाशि तत्त्वं तदेव परमाणुरित्युच्यते ।

पञ्चेन्द्रियविषयगुणवत्त्वाद्धि पञ्चकं नात्र संशयः ॥३॥

पञ्चैव तत्त्वानि सन्ति नात्र संशयावसरः । कस्मात् ? विषयाणां ज्ञानेन्द्रियाणाञ्च पञ्चत्वात् । यदि च षष्ठमपि किञ्चित्तत्त्वं स्यात् पञ्चभ्योऽन्यत् तर्हि तद्गुणोऽपि कश्चित् षष्ठः स्याच्छब्दस्पर्शरूपरसगन्धेभ्यः पञ्चभ्योऽन्यः । तद्ग्राहकमिन्द्रियमपि षष्ठं स्यात् । न च तथास्ति तस्मान्न पञ्चाधिकं तत्त्वं सम्भवं षष्ठमपि किमुताधिकम् ।

आत्मा त्वभौतिकः ॥४॥

यत्तु षष्ठं तत्त्वमात्मा न स भौतिकः । न तस्यापकर्षपर्यन्तमव-

यवविभागाः कर्त्तुं शक्याः। न तस्य परमाणवः । न तस्य भौतिको गुणः। नापि पञ्चेन्द्रियग्राह्यः ।

ते कालत्रयेऽप्यज्ञेया अतीन्द्रियस्वभावगुणवत्त्वाच्च ॥५॥

ते परमाणवः कालत्रयेऽपि ज्ञातुमयोग्याः। भूते प्रलयेऽपि अज्ञेया आसन् । वर्तमानसृष्टावपि तथैव सन्ति । भविष्यत्प्रलयेऽपि ज्ञातुमशक्याः । अतीन्द्रियस्वभावत्वादतीन्द्रियगुणकत्वाच्चेति ।

ते च सृष्टौ संहताः ॥६॥

ते च परमाणवः परस्परं संहताः सन्तो द्व्यणुकाद्युत्पत्तिक्रमेण महाभूतसृष्टौ कारणानि भवन्ति ।

तत्रानुपलभ्यत्वात् ॥७॥

तत्र सृष्टिकाले परमाणवो नोपलभ्यन्ते संहतत्वात् । संघातान्नैकोऽपि परमाणुः पृथक्कर्त्तुं शक्य इत्यज्ञेयास्ते ।

ते हि प्रलये ॥८॥

ते परमाणवो हि महाभूतोपक्रमाणां द्व्यणुकान्तानां कार्याणां प्रलये प्रणाशेऽविकृताः स्वरूपेणावतिष्ठन्ते पुनः सर्गं यावत् ।

जन्यद्रव्यध्वंसः प्रलयः ॥९॥

प्राणिनामशेषभोगप्रदकर्मप्रक्षये जन्यद्रव्याणां सर्वेषां ध्वंसे तदाश्रितानां गुणानामपि ध्वंसः। आत्माश्रितास्तु धर्माधर्माः संचितास्तदानीं सन्त्येव। तेन तेषामपि कालवशाद्भोगाय पुनः सर्गोत्पत्तिः ।

तदनुरोधिसर्वज्ञसंकल्पादाद्यकर्मतः सर्गः ॥१०॥

तत्पदं बुद्धिस्थस्य कर्मणः परामर्शकम्। जीवानां कर्मानुरोधी यः सर्वज्ञस्य भगवतः संकल्पस्तस्मात्परमाणुषु प्रलयकालेऽक्रियेषु आद्यं कर्म । ततो द्व्यणुकादिक्रमेण सर्ग इति न सर्गस्याकस्मिकत्वम्, नापि चेश्वरस्य वैषम्यनैर्घृण्यरूपौ दोषौ ।

अस्ति सर्वज्ञ ईश्वरः ॥११॥

तत्र सर्वज्ञे तस्मिन् भगवति संदिहानं तदभाववादिनञ्च प्रति समाधातुमाह—अस्ति सर्वज्ञ इति । सर्वज्ञत्वाभावे हि अनन्तानां जीवानामनन्तादृष्टपरिज्ञानाभावे तदुपभोगानुरूपभावरचनानुत्पत्तेः ।

स चेश्वरो निरतिशयैश्वर्यसम्पन्नः। अनीश्वराणां जीवानां भूगोलखगोलरचनाकर्तृत्वानुत्पत्तेः।

तददर्शनात् कथं सत्त्वम् ॥१२॥

तस्येश्वरस्य केनापि कदाऽप्यदर्शनात् कथं सत्त्वम्। कथंतरां सर्वज्ञत्वं निरतिशयमैश्वर्यञ्च। कथंतमाञ्च तौ धर्मौ पुरस्कृत्य भूगोलखगोलादिकर्तृत्वमिति प्रश्नः।

कारणत्वाज्जगतः कार्यस्य ॥१३॥

जीवैरशक्यनिर्माणं हि पर्वतसमुद्रभूगोलखगोलादिकं जगत्। तथा च सावयवत्वपरिच्छिन्नत्ववृद्धचपक्षयादियोगित्वादिभिर्हेतुभिः कार्यत्वेनानुमीयमानं स्वकारणतया सर्वज्ञमीश्वरमनुमापयतीति।

शास्त्रयोनित्वाच्च ॥१४॥

शास्त्रं योनिर्ज्ञापकं निमित्तं यस्येति बहुव्रीहिः। शास्त्रज्ञाप्यत्वादित्यर्थः। शास्त्रस्य योनिर्वा षष्ठीतत्पुरुषः। तेन शास्त्रस्य कारणत्वादित्यर्थः। उभयथापि सर्वज्ञ ईश्वरः सिध्यति। तथा हि शास्त्रं हि ऋग्वेदादिलक्षणं तद् ब्रह्मैवेश्वराख्यं सर्वज्ञञ्च जगत्कर्तृतया ज्ञापयति। यतो वा इमानि भूतानि जायन्ते, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत इत्यादि च। मैवंविधं कर्तृत्वं जीवस्य मनसापि सम्भाव्यते। किञ्च ऋग्वेदादिलक्षणं शास्त्रं सर्वथावद्योतकं सर्वज्ञकल्पम्। तस्य च प्रणेता ततोऽप्यधिकतरविज्ञान इति, आधुनिकग्रन्थप्रणेतृदृष्टान्तेनानुमीयते—इत्येवमृग्वेदादिलक्षणशास्त्रकारणत्वेन सर्वज्ञेश्वरसिद्धिरिति।

आत्मसत्तास्वीकारे परमात्मसत्तास्वीकारेऽबाधा ॥१५॥

येषां मते प्रकृतिर्जीवाश्चोभावेव स्तस्ताँल्लक्ष्यीकृत्योच्यते—यदात्मसत्ता प्रतिशरीरं चेत् स्वीक्रियते तदा तु विश्वस्वरूपे शरीरे व्यापकपरमात्मनः सत्तास्वीकारे तु काऽपि बाधा नास्ति। कथमित्युच्यतेऽग्रे।

स्वशरीरकृमिवदेव वयं तच्छरीरे ॥१६॥

यथा मे शरीरे त्वङ्मांसाद्याश्रितकृमयः सन्तोऽपि नावगच्छन्ति न वा पश्यन्ति मदीयां सत्तां तथापि नास्याभिप्रायो यन्मदीया सत्तैव नास्ति। कृमिभिरज्ञाताऽपि स्वकीया सत्ता मया तु ज्ञायत एव।

तथैव विश्वरूपे परमात्मनः शरीरे स्वशारीरकृमिवदेव सानन्दं विलसन्तोऽपि वयं तस्य सर्वव्यापकस्य परमात्मनः सूक्ष्मत्वात् व्यापकत्वाददृश्यत्वाद्, चाक्षुषप्रत्यक्षाभावत्वान्न पश्यामो नावगच्छामः। नाऽस्याभिप्रायो तत्तस्य सत्त्वैव नास्ति। यथाहं स्वशारीरकृमिभिरज्ञातोऽप्रशंसितोऽप्रार्थितोऽपि स्वशरीरं पौष्टिकतत्त्वैः स्वभावत एव पुष्णामि तथैवास्माभिः कृतघ्नैर्मूर्खैर्नास्तिकैश्चाज्ञातोऽस्वीकृतोऽप्रशंसितोऽप्रार्थितोऽपि स परमदयालुः परमात्मा परमाणुस्वरूपपौष्टिकतत्त्वैः स्वभावत एवेमं विश्वरूपं स्वशरीरं सततं पुष्णात्येव। तस्मादात्मसत्तास्वीकारे परमात्मसत्ता स्वीकारेऽबाधैव।

पारार्थ्यादेव प्रार्थनीयः सः ॥१७॥

तत्राहन्तु स्वजीवनायैव पुष्णामि न तु कृमिभ्यः। किन्तु परमात्मा तु विश्वरूपं स्वशरीरं स्वस्मै न पुष्णाति, अपि तु जीवानां शुभाशुभकर्मफलभोगायैव पुष्णातीति कृत्वा पारार्थ्यात् परोपकारित्वात् प्रार्थनीय एवास्माभिः। अत एव नित्यमेवास्माभिः स्वकल्याणाय वन्द्यः।

सूक्ष्मेन्द्रियमपि तदुपलब्धावसमर्थमनात्मत्वादनात्मगुणगोचरत्वाच्च ॥१८॥

सूक्ष्मेन्द्रियं मनोबुद्धिर्वाऽपि परमाणूनां ज्ञानेऽसमर्थं किमुत स्थूलं बाह्येन्द्रियञ्चक्षुरादि। असामर्थ्ये हेतुरनात्मत्वादनात्मगुणत्वादनात्मगुणगोचरत्वाच्चेति। आत्मा, आत्मगुणो वा सुखदुःखादिकं मनोबुद्ध्योर्गोचरः। आत्मगुणस्य ज्ञानस्य गोचरीभूता वा भावाः यथा ज्ञातो घट इति। आत्मगुणेन प्रत्यक्षज्ञानेन गोचरीकृतो घटो मनसा गृह्यते इति। अतीन्द्रियत्वात्परमाणवस्तु न तथा तस्मान्न मानसप्रत्यक्षगोचरा इति भावः। अनुमित्यादिगोचरीकृतानां मानसप्रत्यक्षसम्भवेऽपि तदलौकिकमेव।

चक्षुरादीनाञ्च द्वारत्वात्तदनुपलब्धिर्मनसा ॥१९॥

बाह्यभौतिकविषयोपलम्भे चक्षुरादीनां द्वारत्वान्न चक्षुरादिग्रहणायोग्यानां परमाणूनामुपलब्धिः। तदाहुर्वृद्धाः—अस्वतन्त्रं बहिर्मन इति। चक्षुरादीनां परमाणुग्रहणायोग्यता खलु परमाणूनां वक्ष्यमाणसर्वगुणाव्यक्तत्वादतीन्द्रियत्वाच्च ज्ञेया।

अध्यात्ममाध्यात्मिकेषु च स्वतन्त्रमनन्तरत्वात् ॥२०॥

मनो बाह्यविषयोपलम्भे चक्षुरादिपरतन्त्रमपि आत्मग्रहणे आत्मगुणानाञ्च ज्ञानेच्छानन्दादीनां ग्रहणे स्वतन्त्रम् । आत्मन आत्मगुणानाञ्चान्तरवस्थितानां मनसोऽनन्तरत्वात् । शरीरादिभिर्व्यवधानाभावात् ।

अत एव ब्रह्मानन्दानुभवस्तत्र शरीरेन्द्रियानपेक्षापि ॥२१॥

अत एव ब्रह्मानन्दस्यानुभवो मुक्तौ भवति, न तत्र शरीरेन्द्रियाणामपेक्षा भवति । ब्रह्मणः सर्वव्यापकत्वादात्मन्येव निहितत्वादनन्तरत्वाच्च ।

तेषां सर्गप्रवृत्तिर्भोगाय तदुपरमे मोक्षः ॥२२॥

तेषां परमाणूनां यथादृष्टं भगवत्प्रेरितानां जीवभोगाय द्वचणुकादिक्रमेण जगत्सर्गे प्रवृत्तिः । स्वरूपेण परमाणूनामिन्द्रियग्रहणायोग्यत्वेन भोगासाधनत्वात् । संचितकर्मणां ज्ञानेन नाशात् प्रारब्धकर्मणां भोगेन क्षयात् ज्ञानेनोत्तरक्रियमाणकर्मणाञ्च भर्जितबीजवत् जात्याद्यनारम्भकत्वाद् भोगोपरमे मोक्षः ।

तत्सृष्टं शरीरं भोगायतनम् ॥२३॥

तैः परमाणुभिर्द्वचणुकादिक्रमेण सृष्टं यच्छरीरं तदेव भोगायतनम् । भोगस्यायतनमवच्छेदकम् । कुडचाद्यवच्छेदेनात्मनि भोगानुपलम्भात् ।

शरीरमेव चेतनं भोगवच्चेति चार्वाकाः ॥२४॥

परमाणुभिर्द्वचणुकादिक्रमेणारब्धं शरीरमेव चेतनम् । प्रत्येकं परमाणुषु चैतन्याभावेऽपि तत्समुदायारब्धे शरीरे चैतन्यसम्भवात् । यथा द्राक्षादिषु प्रत्येकं मादकत्वाभावेऽपि तत्समुदाये आसुते मादकत्वं दृश्यते । शरीरमेव भोगवच्चेति चार्वाका आहुः । नास्ति तेषां मते पुनर्जन्म न स्वर्गो नापवर्गः ।

अकालेऽसम्भवस्मृतिदर्शनादात्मसत्ता ध्रुवं पुनर्जन्मस्वीकारात् ॥२५॥

अकालेऽसमये बाल्येऽसम्भवा स्मृतिर्दृश्यते । बहवो बालकाः

ईदृशा जायन्ते ये स्वपूर्वजन्मवृत्तान्तमुदाहरन्ति सत्यमक्षरशः। तस्मादात्मनां जावानां शरीरात् पृथक् सत्ता ध्रुवम्। न चेदात्मास्ति शरीरात् पृथक् नित्यश्च तदा क्व पूर्वजन्मवृत्तान्तस्य संस्कारस्यावस्थानं येन पूर्वजन्मवृत्तान्तस्य स्मृतिर्जायते। स्मृत्या पुनर्जन्मस्वीकाग्नित्याश्चात्मानः शरीरेभ्योऽतिरिक्ता इति।

तेन मुहम्मदादिमतमसाम्प्रतम् ॥२६॥

तेन पुनर्जन्मदर्शनेन मुहम्मदादीनां पाश्चात्यानां धर्मप्रवर्तकाणां मुनीनामस्मिन् पुनर्जन्मविषये मतमयुक्तं पूर्णतया। एकस्मिन् कल्पे सकृदेव जन्म भवति प्रेत्य चैकदा न लभते पुनर्जन्मात्मा आद्वितीयसर्गाद् इति तेषां मतम्।

षष्ठीव्यपदेशाच्च सिद्धः ॥२७॥

षष्ठीव्यपदेशाच्चात्मा सिद्धः। इदं मे शरीरं, इदं मे मतम्, इयं मे बुद्धिः, इत्यादिकं यत्सर्वं षष्ठया व्यपदिश्यते तेन ज्ञायतेऽस्ति शरीरात् पृथगात्मा यस्य शरीरमुच्यते। न चाचेतनस्य शरीरस्य बुद्धिर्मतं वा वक्तुं शक्यते। न वा ज्ञानस्य विचारस्य चाचेतनं शरीरमाश्रयो भवितुमर्हति।

न तत्रानुभूयमानानुभवानुभवितृभेदस्तादात्म्यात् ॥२८॥

तत्र मुक्तौ ब्रह्म, तत्प्रतीतिः, जीवानां भेदो न जायते न भवति। तदा हि जीवो ब्रह्मानन्दस्वरूप एव भवति लौहपिण्डं यथाग्नौ। तादात्म्यमेव तदा जायते।

सैव मुक्तिः त्रिविधतापहानेः ॥२९॥

सैव स्थितिराध्यात्मिकाधिभौतिकाधिदैविकतापरहिता निर्विकल्पा च मुक्तिः। न तदूर्ध्वं पुनर्जन्म मृत्युर्वा भवति।

तद ब्रह्मैव विजानाति सर्वज्ञत्वात् ॥३०॥

अतस्तत्परमाणुस्वरूपं केवलं ब्रह्मैव जानाति यतो हि सर्वज्ञं ब्रह्म।

तन्नायाति वर्णनापथमप्रसिद्धगुणत्वात् ॥३१॥

पुनरपि स्वाप्रसिद्धगुणत्वाद् वेदादिष्वपि वर्णनगोचरतां नायाति परमाणुस्वरूपम्।

तत्कथं प्रतिपाद्यते ॥३२॥

नन्वप्रसिद्धगुणत्वेनावर्ण्यत्वे तत्परमाणुतत्त्वं स्वयमगोचरीकृतं कथं प्रतिपाद्यत इति प्रश्नः। तत्रोच्यते—

शब्दानुमानाभ्याम् ॥३३॥

अत्र प्रमाणयोः संख्यैव विक्षिता न तु क्रमः। समासे पूर्वनिपातेन क्रमस्याप्रतीतेः। एवं च प्रमेयेषु परमाणुषु पूर्वमनुमानस्य प्रवृत्तिः। ततोऽनुमितानाञ्च शब्दप्रमाणगोचरतेति फलितम्।

तदनुमानं मनोलौल्यार्थं भोगप्रकर्षार्थञ्च ॥३४॥

किमर्थं तेषां परमाणूनामनुमानमित्याशङ्क्याह—मनोलौल्यार्थं भोगप्रकर्षार्थञ्च। अत्र लौल्यं परमाणुविषयकजिज्ञासारूपोत्कण्ठा। तदर्थं तन्निवृत्त्यर्थमिति।

अर्थशब्दस्य निवृत्तिवाचकत्वाच्चामरकोषे। मशकार्थो धूम इतिवत्। भोगप्रकषार्थं तावत्परमाणूनां तच्छक्तीनाञ्चानुमाने हि तदारब्धानामणूनां द्व्यणुकादीनां च तत्स्वभावता परिज्ञानेन तत्सङ्ग्रहेण समारब्धकार्यैर्भूमण्डलस्य यातायातयन्त्रादिव्यवहारोन्नतिः। यथा साम्प्रतं चन्द्रलोकयानादिकम्। तत्र गमनप्रयासश्च। चतुर्विंशतिहोरासु भूमण्डलस्य सप्तदश परिक्रमाः कृता रूसदेशीयवैज्ञानिकैर्यानेन। चन्द्रस्य धरातले च यानमवातारयन् ते।

पुनः स्मृतिमात्रमेव न किञ्चिन्नव्यम् ॥३५॥

यत्किञ्चिदपि ज्ञानं विज्ञानं वा विचारात्मकं कार्यात्मकं वा तत्सर्वं विस्मृतस्य स्मृतिमात्रमेव, न तु मूलतो नवीनम्। नासीच्चेत्कुत आयातम्। आसीच्चेत्तदा न कदापि पूर्वं लोकैर्ज्ञायते स्मेति न वक्तव्यम्। पुष्पकविमानादियानानां महाभारतादिषु नानामहाशस्त्राणाञ्चेतिहासे पुराणे प्रसिद्धत्वाच्च। रघ्विन्द्रयोराकाशीययुद्धश्रुतिश्चेति।

नानुमेयेऽभिनिन्द्य परस्परं युद्धयेदविवेकात् युक्तीश्च शृणुयात्सत्यञ्च गृह्णीयात् ॥३६॥

अनुमेयेषु ज्ञानेषु परस्परमभिनिन्द्याविवेकात् विवादं वा युद्धं न

कुर्यात् । अपितु परस्परं युक्तीः तर्कांश्च शृणुयात् विवेकपूर्वकम् । यद्यत्सत्यं प्रतिभासेत तद् ग्राह्यम् ।

प्रत्यक्षत्वाभावस्त्वव्यक्तत्वात् ॥३७॥

ननु परमाणूनां प्रत्यक्षत्वाभावः कस्मात्कारणादित्याकांक्षाया-मुच्यते अव्यक्तत्वात् । यतो हि शब्दस्पर्शरूपरसगंधादिगुणानामव्यक्तत्वात् परमाणूनामतीन्द्रियत्वात्तेऽप्रत्यक्षाः । गुणैरेव हि सर्वेषां प्रत्यक्षं भवति नान्यथा ।

अप्रत्यक्षत्वादेव तत्र पौरुषेया विकल्पाः ॥३८॥

परमाणूनामप्रत्यक्षत्वादेव तत्र पुरुषमतिप्रभवा बह्वो मतवि-कल्पाः सन्तीति ।

ते च सर्वशक्तिमन्त एकरूपा एवेत्येके ॥३९॥

ते च परमाणवः सर्वकार्यानुकूलशक्तिमन्तः सर्वकार्योपादान-भूता एकजातीया एवेत्येके । तदुक्तं वाक्यपदीये "अणवः सर्वशक्ति-त्वाद्भेदसंसर्गवृत्तयः । छायातपतमःशब्दभावेन परिणामिनः" इति । अत्रैकजातीयानामेव परमाणूनां परस्परविलक्षणेन छायातपतमःशब्द-भावेन परिणाम इत्यभिप्रेतम् ।

अनेकजातीयास्त इत्यपरे ॥४०॥

ते परमाणवो हि कार्यवैजात्यस्य कारणवैजात्यं विनाऽनुपपन्न-त्वादनेकजातीया एवेत्यपरे । ते च शब्दस्पर्शरूपरसगंधतन्मात्रपदव्य-पदेश्याः पञ्चानामपि भूतानामपकर्षपर्यन्तभूताः पञ्चजातीयाः । तदुक्तमेकदेशतो वाक्यपदीये—"अभ्राणीव प्रचीयन्ते शब्दाख्याः परमा-णव": इति । एते च पञ्चापि परमाणवः सांख्यानामद्वैतिनाञ्चाकाश-जन्मवादिनां प्रसिद्धाः । चत्वार एव तु नैयायिकानामाकाशनित्य-त्यवादिनाम् ।

न न्याये स्वरूपवर्णनम् ॥४१॥

न्यायदर्शने परमाणूनां स्वरूपवर्णनं न कृतम् ।

परं वा त्रुटेरिति निर्देशोऽल्पः ।४२॥

त्रुटेः परमखण्डनीयमिति गौतमेन यो निर्देशो विहितः सोऽल्पः । नैतेन सम्यगवगम्यते परमाणुस्वरूपम् ।

तथैव काणादेऽपि ॥४३॥

तथैव वैशेषिकदर्शनेऽपि नित्यं परिमण्डलमित्यादिरप्यल्पो निर्देशः ।

सांख्येन निर्दिष्टं विशिष्टम् ॥४४॥

यत्तु सांख्ये कपिलेन निर्दिष्टं तद्विशिष्टम् । तेन किञ्चिज्ज्ञायते विशेषेण ।

यद्धि तन्मात्रसंज्ञकम् ॥४५॥

कश्च स निर्देशो विशेषः, उच्यते, यः शब्दतन्मात्र-स्पर्शतन्मात्र-रूपतन्मात्र-गन्धतन्मात्र इति निर्देशो विहितः । तेन तेषां शब्दादिमद्रूपं विज्ञायते ।

किन्तु तेषां तदनित्यम् ॥४६॥

किन्तु सांख्यानां मते तत्परमाणुस्वरूपमनित्यम् । तन्मात्रसंज्ञकस्य तस्य महाभूतकारणस्य तन्मतेऽहङ्काराज्जन्माभ्युपमात् ।

अहङ्काराच्चितस्तदसम्भवाच्च नित्याः ॥४७॥

अहङ्कारो हि चेतनश्चिदाभासवान्वा । तस्मादचेतनानां परमाणूनां जन्मासम्भावाच्च परमाणूनां नित्यत्वमेवोचितम् । न चान्यथात्र, शाङ्करवेदान्तोक्तमिथ्यात्वेन भेदः । प्रकृतेर्मायया, अन्तःकरणाहङ्कारयोरपि, अज्ञानेन तपदुत्पन्नत्वात्साम्यम् । अत्र चकारः परमाणूनां जन्माभ्युपगमे न्यायवैशेषिकोक्तानवस्थादिदोषसमुच्चयार्थः ।

कथं कीदृशाश्चेति न विस्तरः ॥४८॥

कथं तन्मात्राणि जातानि कीदृशानि चेति न विस्तरः कृतः साख्यैः ।

प्रलयेऽव्यक्तगुणत्वात्समानानीव तन्मात्राणि ॥४९॥

प्रलये पञ्चतन्मात्राणां गुणाः शब्दस्पर्शादयोऽव्यक्ता इति तदानीमपि भिन्नगुणवत्त्वेन विषमाण्यपि तन्मात्राणि, अव्यक्तगुणत्वात्समानानीव भवन्ति तान्येव च परमाणवः । कथं तेषामव्यक्तत्वं जायत इत्यग्रे वर्णयिष्यते ।

अव्यक्तगुणत्वेनानुपलभ्याः तदनिर्वाच्यमित्यद्वैतवेदान्तिनः ॥५०॥

ये तन्मात्राणां गुणाः शब्दस्पर्शादयस्तेऽव्यक्ता अतस्तन्मात्राणि नेन्द्रियग्राह्याणि । अत एव च तेषां तन्मात्राणामसत्त्वादिरूपैरनिर्वाच्यत्वरूपं मिथ्यात्वमिति अद्वैतवेदान्तिनो मन्यन्ते ।

वृथाप्रतिकूलेऽनिष्टत्याज्ये हि मिथ्या, न त्वसत् ॥५१॥

यद्धि कार्यसिद्धावसमर्थम्, तदसमर्थत्वादेवानिष्टं भवति । यद्धि न केवलमसमर्थमपितु प्रतिकूलम् अर्थात् कार्यसिद्धौ न केवलमसाधकमपि तु बाधकम्, तत्तु त्याज्यं भवति । तदुभयमपि मिथ्योच्यते, यथा अग्निप्रज्वलने मृत्तिका वृथा तस्मादनिष्टा । तथा च जलं न केवलमसाधकमपितु बाधकम्, तस्मान्न केवलमनिष्टमुपेक्षणीयं वा, अपितु त्याज्यम् । उभयमपि लोके मिथ्योच्यते । न तु असन्मिथ्योच्यते । सर्वथाऽसच्चेन्मिथ्योक्तिरयुक्ता ।

तदेव मिथ्यात्वं मे कैवल्यानुपायत्वाद्विरोधित्वाच्च ॥५२॥

तदेव तथाविधमेव मिथ्यात्वं मम मतौ वक्तुं शक्यते । कथम् ? मुक्तेरनुपायत्वादपि तु बाधकत्वाच्च । यतो हि न शब्दस्पर्शादय उदासीना भवन्ति मुमुक्षुं प्रति अपि तु तं बाधन्तेऽपि । मुक्तिरेव चतुर्थः पुरुषार्थः ।

ज्ञानाभ्यासाभ्यां सच्चिदानन्दात्मनि ब्रह्मणि वह्नावयोगोलकस्येव तादात्म्येन प्राप्तिपूर्वकमवस्थानं मुक्तिः ॥५३॥

सच्चिदानन्दात्मकं हि ब्रह्म, ज्ञानेन समाधिलाभादिना धर्ममेघेन वा प्राप्य तत्रायोगोलकस्य वह्नाविव तादात्म्येनावस्थानमेव मुक्तिः ।

सा च शाश्वतीत्येके ॥५४॥

सा च मुक्तिः प्रध्वंसवदनन्तेति न मोक्षात्पुनरावृत्तिः । न च पुनरावर्तते इति श्रुतेः । ज्ञानेन सर्वकर्मणां प्रक्षये जात्यायुर्भोगप्रदकर्माभावे मोक्षात् पुनरावृत्त्यसम्भवाच्च ।

न चेत्पुनरावृत्तौ न वैशिष्टयम् ॥५५॥

पुनरावृत्तिश्चेन्न मुक्तौ किञ्चद् वैशिष्टयं भवति। न बद्धमुक्तयोर्भेदविशेषः।

पुनरावर्तते इति तु दयानन्दः सर्गलोपप्रसङ्गात् साध्यत्वाच्च ॥५६॥

पुनरावर्तते जीवो मुक्तेर्मुक्तिकालसमाप्तौ, इति तु दयानन्दस्य मतम्। न चेत्पुनरावृत्तिः शनैः शनैरेकैकं कृत्वा सर्वेषां मुक्तिलाभे कदाप्युच्छेदः स्यात् सर्गस्य विसर्गस्य च चक्रस्येति सर्गलोपप्रसङ्गः प्रसज्येत् तथा मुक्तेः साध्यत्वाच्च। यः सिद्धः स नित्यः। यो यत्नेन साध्यः सोऽनित्यः। मुक्तिर्हि यत्नेन साध्यास्ति न सिद्धा तस्मात्साध्यत्वादनित्येति साधुरत्र दयानन्दः प्रतिभाति।

जीवानामसंख्यत्वान्नेत्यन्ये ॥५७॥

यदा हि जीवा असंख्या अनन्ताश्च सन्ति कथं सर्वेषु मुक्तेषु कदाप्युच्छेदः स्यात् सर्गस्य। अननन्तत्वदोषप्रसङ्गः संख्येया इति।

नेति दयानन्दः सर्वज्ञत्वाद् ब्रह्मणः ॥५८॥

तन्न इति दयानन्दः। लोष्ठगत परमाणूनपि संख्यातुं लाके संख्या नास्ति किमुताशेषाणां जीवानां परमाणूनां वा कथा। मनुष्यैरल्पज्ञैरसंख्येया, न ब्रह्मणा सर्वज्ञत्वात्। अन्यथा, असर्वज्ञत्वापत्तिः। न च कश्चिन्नवीनो जायते नापि नश्यति। यावन्तः सन्ति तावन्तः सन्ति। ते च शक्याः संख्यातुं ब्रह्मणा।

आदीर्घतमकालतापत्रयात्यन्ताभावो वैशिष्टयं लोकवत् ॥५६॥

मुक्तौ दीर्घतमकालपर्यन्तं तापत्रयस्यात्यन्ताभावः, अपितु ब्रह्मानन्दस्वरूपमहानन्दप्राप्तिरेव वैशिष्टयम्। यथा लोके दृश्यते दीर्घतराय दीर्घतमाय च सुखाय यतन्ते विशेषयन्ति च तमवाप्य, तथा मुक्तिर्विशेष्या।

उभावपि पक्षौ साधू, मन्तव्यं यत्स्वतुष्टिकृत् ॥६०॥

ज्ञानेन सर्वकर्मणां तज्जन्यवासनानाञ्च नाशात्। भर्जितबीजेभ्योऽङ्कुरानुत्पत्तिवन्न पुनरावृत्तिरित्यपि साधु मतम्। सर्गलोपप्रस-

ङ्गात् साध्यत्वाच्चानित्या मुक्तिरित्यपि साधु दयानन्दमतम् । प्रतीयेते तर्कैरुभावपि पक्षौ साधू । पुनरपि सत्यन्तु, एकमेव, ब्रह्मैवात्र जानाति । अस्माभिस्तु यत्स्वतुष्टिकृन्मतं प्रतीयेत्तदेव मन्तव्यम् । न तु द्रुह्येत्, न वा विवदेत् ।

मम तु दयानन्दमतमेवाभिमतम् । यतो हि तन्मतमकाट्यमेव । भर्जितबीजेषु न पुनः प्ररोह इति तर्कस्तु नोऽकाट्यः प्रलयाग्निना भस्मीकृतेऽपि सर्वस्मिन् पुनः सृष्टौ किं प्ररोहो न भवति ? भवत्येव । भस्मीकृतबीजेष्वपि तदीयपरमाणुषु न कापि विकृतिः संजायते । ते पुनः संहत्य प्ररोहं कुर्वन्त्येव कालान्तरे । अतो नायं तर्कोऽधिको गम्भीरः । दयानन्दतर्कास्तु परमगम्भीराः ।

नातो मायया तस्य किञ्चित् प्रयोजनम् ॥६१॥

अतः मायायाः मोक्षानुपायत्वादपितु तद्विरोधित्वाच्च मुमुक्षुर्जीवस्य प्रकृतिशब्दाभिधेयया मायया जन्ममृत्युजराव्याधिदुःखदोषप्रसञ्जिकया न किञ्चित्प्रयोजनम् ।

प्रकृतिसत्यत्वेऽपि धर्ममेघेनात्यन्तचित्तवृत्तिनिरोधस्तद्विविक्तदृग्दृष्ट्यै ॥६२॥

प्रकृतिसत्यत्वेऽपि धर्ममेघसमाधिना चित्तवृत्तीनामत्यन्तनिरोधः कार्यः । तद्विविक्तस्य—प्रकृतिविविक्तस्य दृशः पुरुषस्य दृष्ट्यै । तदा हि द्रष्टुः स्वरूपेऽवस्थानम् । इतरस्मिंस्तु काले वृत्तिसारूप्यं द्रष्टुः पुरुषस्येति विवेकाग्रहाद् बन्धः । सत्त्वपुरुषान्यताख्यातेस्तु तस्यापवर्ग इति सांख्ययोगाचार्य्याः ।

नेतरोऽध्वा मुक्तये प्रकृतिविस्मृतिसत्त्वपुरुषान्यताख्यातिभ्याम् ॥६३॥

योगरीत्या चित्तवृत्तिनिरोधेन प्रकृतिविस्मृतिः, बुद्धिपुरुषयोर्भेदग्रहश्च । ताभ्यामन्यो मुक्तयेऽध्वैव न विद्यते । ज्ञानादेव हि मोक्ष इति सर्वाभ्युपगमात् ।

अर्जुनवच्चान्यविस्मृतिः ॥६४॥

अर्जुनवच्च प्रकृतिविस्मृतिः सम्पाद्या । यथा द्रौपदीस्वयंवरे मत्स्याक्षिव्यधनसमयेऽर्जुनस्य नेत्रान्यविस्मृतिः । यथा वा तस्यैव धनु-

विद्यापरीक्षाकाले वृक्षाग्रस्थापितकाष्ठभासव्यधनकाले तदन्यविस्मृतिः । तद्वन्मुमुक्षुणा योगेन प्रकृतिविस्मृतिः सम्पाद्येति भावः । यथोक्तमुपनिषदि—"प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्" ॥ तत्र ब्रह्मलक्ष्यव्यधनेऽपि प्रकृतिविस्मृतिरेवैकोऽध्वेति शाङ्करमतरहस्यमिति मे मतिः । तद्रहस्यगोपनायैव प्रपञ्चमहाप्रपञ्चादिनिरूपणं कृतम् । तदवास्तविकमपि अद्वैतकल्पनमनिवार्यम् । नान्यथा ब्रह्मलक्ष्यव्यधनं सम्भवम् । प्रकृतिसत्यत्वेऽपि तदभावकल्पना निर्विकल्पकज्ञानार्थमेव । अन्यथा, इदं ब्रह्म, इयं प्रकृतिः एतद्गुणयुक्तेति नानासंकल्पविकल्पविचारणानुगतत्वान्न योगो न समाधिर्न मोक्ष इति भावः ।

न च तत्सत्ता नास्ति, उपादानग्रहणात् ॥६५॥

अस्या अभावकल्पनाया नेदं तात्पर्यं यत्तस्या अव्यक्तायाः परमाणुरूपायाः प्रकृतेः सत्त्वैव नास्ति । कुतः ? उपादानग्रहणात्, न चाचेतनस्य जगतश्चेतनमुपादानम् ।

अज्ञानात् कल्पनेति चेदसर्वज्ञत्वापत्तिः ॥६६॥

अज्ञानोपाधिकं ब्रह्म जगत्कल्पयति इत्यद्वैतिनामभ्युपगमेऽज्ञानं ब्रह्मोपाधिर्ब्रह्मगतं वेति चेद् ब्रह्मणोऽसर्वज्ञत्वापत्तिस्तेन । अन्यगतश्चेन्न तस्य ब्रह्मोपाधित्वसम्भवो द्वैतञ्च ।

तद्वशीभूतञ्चेदनीश्वरत्वापत्तिर्जीववत् ॥६७॥

अज्ञानस्य स्वोपाधेर्वशीभूतञ्चेद् ब्रह्म तदा तस्य तथाभूतस्य, अनीश्वरत्वापत्तिः । असर्वशक्तिमत्तेति भावः ।

तद्वश्यास्तु जीवाः ॥६८॥

अल्पज्ञत्वाज्जीवास्तु तदज्ञानस्य वश्याः । यतस्ते सुखिनो दुःखिनश्च जाता मृताश्च दृश्यन्ते संसरन्तः । शरीरेण योगो जन्म, ततो वियोग एव मृत्युः ।

न चेतनादचेतनाच्च चेतनः ॥६९॥

चेतनाद् ब्रह्मणोऽचेतनाया मायायाश्च चेतनस्य जीवस्य न जन्म सम्भवति । चेतनाद् ब्रह्मणश्चेतनो जीवो नोत्पद्यते, नित्यत्वात् ।

नित्यत्वञ्च जन्मान्तरसम्बन्धात् । जन्मान्तरसम्बन्धश्च जातिस्मराणां स्मृतिदर्शनात् । यथाद्यत्वे, इन्द्रप्रस्थनिकटे मोदीनगरे जातश्चैकश्चर्मकारपुत्रोऽष्टादशवर्षीयो निरक्षरो गाश्चारयन् कदापि मध्याह्ने सुप्त्वोत्थाय, मुनिवरो इति शब्देन सम्बोध्य मत्तप्रलाप इव वेदमन्त्रानुच्चारयति सस्वरान् दाक्षिणात्यपद्धत्या । इति तु सर्वं विजातीयजात्यायुर्भोगार्थं विजातीयकर्मपूर्वप्रज्ञासम्बन्धात् । तथा चाचेतनाया मायाया अपि न जीवोत्पादकत्वम् । कृतहान्यकृताभ्यागमप्रसङ्गात् कार्यकारणवैरूप्याच्च ।

न हि सतोऽभावोऽसतश्चोपलब्धिः ॥७०॥

न हि सतो जीवस्य ब्रह्मणो वाऽभावः सम्भवति नित्यत्वस्वभावत्वात् । नापि असतः शशशृङ्गादेरुपलब्धिः । उपलभ्यते च मायाकार्यं जगत् । तेन तत्कारणं माया, प्रकृतिः परमाणुरूपा सत्यैव नासती ।

ततस्त्रयमनादि ॥७१॥

तस्माद् ब्रह्म जीवो माया चेति त्रितयमनादि । अनादित्वाच्च नित्यम् ।

सर्वलये त्रितयमवशिष्यतेऽवशिष्यते ॥७२॥

तस्मात्सर्वेषां कार्यभावानां प्रलये तु ब्रह्म जीवाः परमाणुरूपा प्रकृतिश्चेति त्रितयमवशिष्यते इति सिद्धम् । अवशिष्यत इत्यन्त्यपदस्य पुनरुक्तिरध्यायसमाप्तिसूचिका ।

इति प्रथमे पादे प्रथमोऽध्यायः ।

अथ प्रथमे पादे द्वितीयोऽध्यायः

ब्रह्मणः खमुपजायते ॥१॥

ब्रह्मणो निमित्तभूतात् खमुपजायते शब्दतन्मत्राख्यान् परमाणूनुपादानीकृत्य । तथा च श्रुतिः "एतस्मादात्मन आकाशः सम्भूतः आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधिभ्योऽन्नम्, अन्नाद्रेतो, रेतसः पुमान् तत इदं सर्वं जगत्" इति ।

खादनिलः ॥२॥

स्थूलं खं निमित्तीकृत्यानिलपरमाणूंश्चोपादानीकृत्य स्थूलोऽनिल उत्पद्यते ।

अनिलादनलः ॥३॥

अनलादापः ॥४॥

अद्भ्यः पृथिवी ॥५॥

एषां सूत्राणां पूर्ववद् व्याख्यानम् ।

तेभ्यः सर्वं चराचरम् ॥६॥

तेभ्यः पञ्चमहाभूतेभ्यस्तानुपादानीकृत्य सर्वं चराचरं स्थावरजङ्गमञ्जगज्जायते ।

कारणगुणैर्गुणाः कार्ये स्वभावतः ॥७॥

कारणगुणैः कार्ये गुणास्तत्सदृशाः स्वभावतो जायन्ते । यथा वायौ शब्दः, अग्नौ स्पर्शशब्दौ ।

असाधारणगुणास्तु स्वतः ॥८॥

असाधारणगुणास्तु स्वत एव समुत्पद्यन्ते । यथाग्नौ रूपौष्ण्य-गुणौ न वायोः, किन्तु वह्निस्वरूपादेव जायेते ।

सर्वमहाभूतेष्वपि तथा ॥९॥

तथैव सर्वपञ्चमहाभूतेष्वपि, कारणगुणपूर्विका स्वाभाविकी च गुणसृष्टिरवगन्तव्या ।

पूर्वेषामुत्तरेषु प्रवेशः सूक्ष्मत्वात् ॥१०॥

पूर्वेषां महाभूतानामुत्तरेषु सूक्ष्मत्वात्प्रवेशो यथाकाशस्य वाय्वादिचतुर्षु वायोश्च वह्न्यादित्रिषु तथैवाग्रेऽपि बोध्यम् । तथा च गौतमः "विष्टं ह्यपरं परेण" इति । अर्थात्संहतैरपि सूक्ष्मत्वात्परैर्महाभूतैरपराणि महाभूतानि विष्टानि ।

एवं पूर्वगुणानामुत्तरेषूपलम्भः ॥११॥

एवं हि पूर्वमहाभूतगुणानामुत्तरेषु महाभूतेषु उपलब्धिरुपपद्यते । गुणिनां प्रविष्टत्वात् संयुक्तत्वात् ।

उत्तरेषां पूर्वेष्वप्रवेशः स्थूलत्वात् । १२॥

स्वस्वपूर्वापेक्षया स्थूलतरत्वादप्रवेशः पूर्वेषु महाभूतेषु जलादिषु चतुर्षु पृथिव्यादीनां चतुर्णामुत्तरेषां महाभूतानाम् । यथा पृथिवी न जलादौ प्रविष्टा, जलं नाग्न्यादौ प्रविष्टमित्यादि ।

अत एवानुपलम्भः पूर्वेषूतरगुणानाम् ॥१३॥

अत एव पूर्वेषूत्तरमहाभूतानामप्रवेशादेव पूर्वेषूत्तरगुणानामनुपलब्धिः ।

शीतलोष्णसुगन्धिदुर्गन्धित्वादीनि पवने वाहकत्वात् ॥१४॥

यत्तु वायुः शीतलः, उष्णः, सुगन्धिर्दुगन्धिरित्यनुभूयते तत्तु केवलं वाहकत्वादेव । यदा जलं वहति तदा शीतलः । यदाग्निं वहति तदोष्णः । यदानुकूलप्रतिकूलगन्धभृत्त्रसरेणून् वहति तदा सुगन्धिः पवनो दुर्गन्धिः पवन इत्युनुभूयते । न ते गुणाः वायोः । तथा चोक्तमायुर्वेदेः—

पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥

इति वायौ पृथिवीजलाग्नीनां गुणानामतिव्याप्तिर्वारिता ।

आद्यपतनासमवायिकारणं गुरुत्वं जलपृथिवीवृत्ति इति काणादगौतमीयाः ॥१५॥

पक्वस्य फलस्य प्रथमपतनेऽसमवायिकारणं गुणो गुरुत्वम् । तच्च पृथिव्याञ्जले च वर्त्तते नेतरभूतेषु इति काणादगौतमीयाश्च मन्यन्ते । अन्यैरपि शास्त्रकृद्भिरप्रत्याख्यानात्स्वीकृतमेव पतनकारणं गुरुत्वम्, अप्रतिषिद्धञ्चानुमतं भवतीति न्यायात् ।

नास्ति गुरुत्वम्, आकर्षणशक्तिरेव तत्कार्यकृदिति नव्य-वैज्ञानिकाः ॥१६॥

पक्वे फले पतनकारणीभूतं गुरुत्वं न किमपि । किन्तु भूमौ वर्त्त-मानाऽऽकर्षणशक्तिरेव गुरुत्वकार्यं पतनं करोति, अर्थात् गुरुत्वमा-कर्षजमेवेत्याधुनिकभौतिकवैज्ञानिकाः ।

अर्थपूर्वन्तु शब्द इत्यस्ति गुरुत्वमिति प्राञ्चः ॥१७॥

अर्थावबोधार्थं हि लोके शब्दः प्रयुज्यते । यद्यर्थो लोके न भवेत्तदा तदवबोधार्थं लोके शब्दोऽपि न प्रयुज्येत । प्रयुज्यते च सर्वस्मिन् देशे सर्वस्मिन्काले सर्वासु च भाषासु सर्वजातीयैर्नरैः, इदं गुरु, इदमेतस्मा-ल्लघु इति । ततो ज्ञायतेऽस्ति गुरुत्वं किञ्चिद्गुण इति । हस्तोत्तोलनेन च गुरुत्वं लघुत्वञ्च ज्ञायते व्यवह्रियते चेत्यस्ति गुरुत्वमिति प्राञ्चो भारतीयाः ।

आकर्षणशक्त्यैव व्यवस्थिताः सूर्यादयः ॥१८॥

आकर्षणशक्त्यैव ग्रहनक्षत्रसूर्यचन्द्रादीनामाकाशे स्वस्वकक्षासु व्यवस्थानमिति नव्यवैज्ञानिकाः ।

वायुकक्षासु भ्रान्तिरिति प्राच्याः ॥१९॥

नियतदिशासु नियतकालगतिमतीषु च स्वस्ववायुकक्षासु चन्द्रसूर्यादीनां नियतं भ्रमणं सततमिति प्राच्या ज्योतिर्विदः ।

परमाणुसंख्याभेदादाकर्षणशक्तिभेदाद् गुरुत्व-भेद इति नव्यानाम् ॥२०॥

प्रतिपरमाणुं पृथिव्या आकर्षणं वर्तते तस्मात्पदार्थेषु संयुक्त-परमाणुसंख्याभेदादेवाकर्षणभेदः । आकर्षणभेदादेव गुरुत्वभेदः । उपपद्यतेऽतः काष्ठलोष्ठपाषाणलौहपारदादीनां गुरुत्वभेदः इति तेषामाशयः, नव्यानामिति । एतदेव मेऽभिमतम् ।

तदभिभवे, आकाशगमनं योगिनो मनोजवित्वञ्च ॥२१॥

तदाकर्षणशक्तेः संयमादवरोधात् कायाकाशसंयमाच्चाकर्षणाभिभवे गुरुत्वाभावेन योगिनामुत्पतनं भवति । कायाकाशयोः सम्बन्धसंयमादित्यस्य स्थाने कायपृथिव्योः सम्बन्धसंयमादिति वक्तव्यं योगदर्शने । मनोजवित्वञ्च, आत्ममात्रगतित्वात् ।

प्रमत्तगीत एष इति नव्यवैज्ञानिकाः ॥२२॥

आकाशगमनान्तर्धानादियोगविभूतयः प्रमत्तगीत एष भारतीयानामिति नव्यपाश्चात्यवैज्ञानिका ब्रुवन्ति ।

यथाविध्यनुष्ठाय प्रत्याख्यानं पण्डितानामिति प्राच्याः ॥२३॥

इदञ्चाकाशगमनादिकं यथाविध्यनुष्ठानेन सिद्ध्यति । तदकृत्वैव प्रत्याख्यानमाधुनिकानां न युक्तमित्ति प्राच्याः ।

अचिन्त्या हि मनसः शक्तिः ॥२४॥

अचिन्त्या हि भवति मनःशक्तिः । यथा विदुषां विद्यातारतम्यमलौकिकमनुभूयते जगति, कार्याणि चालौकिकानि महान्ति मनःशक्तिसम्पाद्यानि दृश्यन्ते लोके ।

प्राणस्य च ॥२५॥

प्राणस्य चाचिन्त्या शक्तिः । ययोरसि हस्तिनमारोहयन्ति, भूयानादिकञ्चावरुन्धन्ते साधकाः प्राणायामेन ।

शब्दप्रयोगस्तु प्रतीतेः सिद्धार्थपूर्वः ॥२६॥

यत्तूक्तमर्थपूर्वो हि शब्दप्रयोगस्तस्मादस्ति गुरुत्वमिति, तन्न, आकर्षेण गुरुत्वप्रतीतेः शब्दप्रयोगः सिद्धोऽर्थपूर्वः । यथेन्द्रजालेन प्रतीय-

मानस्यैव नामानि न वास्तविकं किञ्चित् । इति प्रतीतिमात्रे शब्द-प्रयोग इत्येवात्राभिप्रायः ।

हस्ताकर्षणपीडनाभ्यां गुरुत्वप्रतीतेः सिद्धमाकर्षजम् ॥२७॥

तथा च हस्तेनाकर्षणेन पीडनेन च नीचैर्गमनप्रतीतेः गुरुत्वप्रतीतेश्च सिद्धमाकर्षणोत्पन्नमेव गुरुत्वम् ।

अन्यथा अधोगतानामस्माकं पातः स्यात् ॥२८॥

अन्यथा गुरुत्वे सति आकर्षणाभावे च पृथिव्यां पश्चिमतः पूर्वाभिमुखं सततं भ्रमणशीलायामस्माकं गेहादीनामस्माकञ्च, अधोगतानां रात्रौ गुरुत्वात्पृथिव्याः दूरं पातः स्यात् । तस्मादस्त्याकर्षणं येनैव गुरुत्वप्रतीतिर्भवति तथा च ग्रहादीनां नियतदेशावस्थानं नियतदिक्कालभ्रमणञ्चासृष्टेः सम्भवति ।

सर्वापि शक्तिर्ब्रह्मणस्तस्य सर्वानुगतत्वात् ॥२९॥

सर्वेषु कारणेषु या तत्तत्कार्यानुकूला शक्तिः सा ब्रह्मण एव । तस्यैव सर्वशक्तिसम्पन्नत्वात् सर्वानुगतत्वाच्च । यथोपनिषदि—यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यन्ति, यन्मनसा न मनुते येनाहुर्मनो मतं, तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । तथा च दुर्गासप्तशत्याम्—

"यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाऽखिलात्मके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे जनैः ॥"

इति । अनेन ब्रह्मशक्तेर्देव्याः सर्वभावानुगतशक्तिरूपत्वं प्रदर्शितम् ।

जीवशक्त्या शरीराङ्गं ब्रह्मशक्त्या जगत्तथा ॥३०॥

यथाजीवशक्त्या शरीराङ्गानि क्रियाशीलानि भवन्ति तथैव सर्वव्यापकब्रह्मशक्त्यैव सम्भूय जगदिदं गतिमदस्ति ।

न चेच्छक्तिर्न चाकर्षो न गुरुत्वं न च क्रिया ॥३१॥

यदि च शक्तिर्न स्यादाकर्षणमपि न स्यात् तदा न तु गुरुत्वं स्यात् न तु ग्रहादीनां भ्रमणादिक्रिया स्यात् । सृष्ट्यनुकूलापि क्रिया न सम्भवेत् ।

सा गतिकृच्छक्तिर्ब्रह्मणश्चेतनगुणत्वात् ॥३२॥

सा सर्वेषु परमाणुषु सर्वेषु ग्रहादिषु च गतिकारिणी शक्तिः तस्यैव ब्रह्मणः । यतो हि चेतनस्यैव शक्तिर्गुणः ।

पञ्चभूतेषु समर्प्यत इव ॥३३॥

अतो ब्रह्मणैव स्वशक्तिः पञ्चभूततत्त्वेषु अव्यक्तात्मकेषु परमाणुषु समाधीयत इव ।

तदिच्छया प्रेरणया हि सृष्टिः ॥३४॥

ब्रह्मेच्छया ब्रह्मशक्तिकृतया च प्रेरणया सृष्टिर्भवति । यथाचोक्तं वाक्यपदीये ब्रह्मकाण्डे कालशक्तिनिरूपणावसरे कारणशक्तेः प्रतिबन्धाऽभ्यनुज्ञे ।

समाकर्षणशक्तिमत्त्वान्न सृष्टिः संहननासम्भवात् ॥३५

यदि च परमाणुष्वेव परस्परं समानमाकर्षणं समा शक्तिर्वा मन्येत तदा न सृष्टिरभविष्यत् संहननशक्तेरभावात् ।

असमानञ्चेन्न प्रलयासम्भावात् ॥३६॥

यदि परमाणुष्वेवासमानाकर्षणशक्तिर्मन्यते तर्हि कदापि न प्रलयो भवितुमर्हति । सदैव प्रबलाकृष्टत्वान्न संघातहानिः ।

संहननविभाजनोभयात्मिका चेदौदासीन्यं तत्रापि नियामकापेक्षा ॥३७॥

यदि च संहननात्मिका विभजनात्मिका चोभयरूपा शक्तिः परमाणुषु वर्तते तदपि न । केषुचिच्चेत्संहननात्मिका शेषेषु च परमाणुषु विभजनात्मिका अथवा प्रतिपरमाणुमुभयात्मिका चेदौदासीन्यमुभयथापि भविष्यति । परस्परविरुद्धत्वात् परस्पररोधाद् यथोक्तं पूर्वं न सृष्टिः नापि प्रलयः स्यात् । औदासीन्योत्पत्तेः तत्रापि कश्चिन्नियामकः स्यादेवेत्यपेक्षा ।

तत्प्रेरकशक्तिस्तदाधारश्च मतम् ॥३८॥

तस्मादेव कारणादव्यक्तपरमाणुप्रेरणार्थं बाह्यशक्तिः तदाश्रयो ब्रह्म च परमाणुभ्यस्तु पृथगेवानुमीयते । तथा च गौरवादचेतनगुण-

त्वाभावाच्च न परमाणुषु शक्तिर्मता। शक्तेरचेतनगुणत्वाभावश्च संकल्पप्रयोज्यत्व एव कार्यकरत्वादिति। अचेतनेषु हि संकल्पाभावात्।

अत्र नास्तिकपराजयः ॥३९॥

अस्मिन्नेवस्थाने नास्तिकानां परमाणौ नित्यशक्तिपोषकाणां पूर्णपराजयो भवति। कार्यत्वाज्जगतः नित्यत्वाभावात् क्षणिकत्वात्। तथा च स्वयं सृष्टिप्रलयासम्भवाद् ब्रह्मानिवार्यम्।

स्वशक्तिनिरोधात् पुनश्च प्रलयः पुनश्च प्रलयः ॥४०॥

यदा हि ब्रह्म स्वशक्तिं पुनः स्वलीनां करोति तदैव पञ्चमहाभूतानि, अशक्तान्यनाकर्षाणि भूत्वा पूर्ववदव्यक्तीभूय ब्रह्मलीनानि भवन्ति, पुनश्चैकं खल्विदं ब्रह्म बाह्यवस्तुशून्यं यथोर्णनाभिः।

इति जगदीशाचार्यविरचिते परमाणुदर्शने द्वितीयोऽध्यायः
प्रथमः पादश्च
समाप्तः।

अथ द्वितीयपादे प्रथमोऽध्यायः

सृष्टिवर्णनं सारल्यार्थम् ॥१॥

अथ सृष्टिसमुत्पत्तिवर्णनं क्रियते । ननु परमाणुजिज्ञासायां सृष्टिवर्णनमारभ्यते न तु परमाणुस्वरूपवर्णनम् । विनायकं प्रकुर्वाणो रचयामास वानरमिति वदिति चेन्न, सृष्टिवर्णनं विना परमाणुस्वरूपवर्णनं न सम्भवति । यतो हि कस्मिन्महाभूते के के गुणाः, तेष्वपि के स्वकीयाः के च परकीया इति ज्ञानं विना न हि परमाणुस्वरूपवर्णनं समीचीनं भविष्यतीति सरलतयाऽवगत्यर्थमेव पूर्वं सृष्टिक्रमवर्णनमनिवार्यम् ।

सा शक्तिः पूर्वमाकाशे, तया परमाणुप्रेरणा ॥२॥

सा ब्रह्मशक्तिः पूर्वमाकाशेऽव्यक्ते शब्दतन्मात्रपरमाणुषु प्राप्ता । तेन संहत्य स्थूलं व्यापकतरमाकाशमुत्पन्नम् । यथा चोक्तं वाक्यपदीये "अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः" । पुनश्च तयैव शक्त्या क्रमशश्चतुर्भूतपरमाणुष्वपि प्रेरणारूपा गतिरुत्पन्ना । शब्दाख्याः शब्दतन्मात्राख्या इति ।

प्रेरणया चतुर्भूतपरमाणुसंहननक्रिया क्रमशः ॥३॥

तया प्रेरणया गत्या वाय्वग्निजलपृथिवीपरमाणुषु क्रमशः संहननक्रियाया आरम्भः ।

संघातैकदेशत्वाच्छेषदेशोऽवकाशो महाकाश इति केचित् ॥४॥

संहननक्रियाद्वारा यच्चतुर्भूतपरमाणूनां क्रमशः एकत्रीभवनं पूर्वं हि वायोः पश्चादग्नेर्जलस्य पृथिव्याश्च संघातस्तेन रिक्तस्थानमेव महाकाश उच्यते । न तद् द्रव्यमिति केचित्, चत्वारि एव तत्त्वानि वाय्वग्निजलपृथिव्य इति ।

तन्न, द्रव्यं ह्याकाशम् ॥५॥

यदावरणाभावरूपावकाश एवाकाशमुच्यते बौद्धादिभिस्तन्न, यतः पञ्चेन्द्रियाणि पञ्चैव तत्तद्ग्राह्या विषयाः पञ्चैव तेषामाश्रय-द्रव्याणि स्युरिति शेषत्वाच्छब्दस्याश्रयमाकाशमेवेति गम्यते । नात्र संशयावसरः ।

तस्माद्वायुः ॥६॥

तस्माच्छब्दतन्मात्रेभ्यः सम्भूतान्महत्तराकाशादर्थात् आकाश-स्य गर्भाद् वायुः, वायुपरमाणूपादानकः सम्भूतः आविर्भूत इति । तथैव वायोरग्निरग्नेरापः अद्भ्यः पृथिवी इति ज्ञेयम् । उत्तरोत्तरापेक्षया पूर्वपूर्वस्य महत्तरत्वात् व्यापकत्वात् । तथा हि पृथिव्यपेक्षया दशगुणं जलं तदपेक्षया दशगुणमधिकं तेजस्तदपेक्षया दशगुणमधिकं वायुः, तदपेक्षया दशगुणमधिकमाकाशम् इत्यादि पुराणानि पञ्चदशीञ्चानु-सृत्य विज्ञेयम् ।

नाकाशं विभु, इतरभूतसामान्यात् ॥७॥

आकाशं विभुत्वाभाववत् भूतत्वात्, पृथिव्यादिवत्, इत्यनुमानम् । आकाशस्य कार्यत्वेन परिच्छिन्नत्वानुमानञ्चात्रानुकूलम् । पुराणा-दिभ्यः श्रुतिभ्यश्चाकाशस्योत्पत्तिमत्त्वेन परिच्छिन्नपरिमाणवत्व-मवसीयते । यथोक्ता श्रुतिः—एतस्मादात्मन आकाशः सम्भूतः ।

वायोरन्तर्बहिश्च खं महत्तरत्वात्सूक्ष्मत्वाच्च ॥८॥

यद्यपि घटादेरिव मृदादेराकाशं वायोरूपादानकारणं न भवति तथापि वाय्वपेक्षया सूक्ष्मत्वात् वायोरन्तः, महत्तरत्वाद् बहिश्चाकाशं वर्तते ।

अतः सशब्द इव वायुः ॥९॥

आकाशस्य वाय्वन्तःप्रवेशादेव सशब्द इव वायुः प्रतीयते आकाशानुपादानकोऽपि ।

स्पर्शस्तु तत्स्वभावः ॥१०॥

स्पर्शस्तु वायोः स्वभावः स्वकीयो गुण इति एवमग्न्या-दिष्वप्याकाशानुप्रवेशाच्छब्दवत्त्वम्, यथाग्नौ चटचटाशब्दो, जले

बुद्बुद्कलकलध्वनिरित्यादिकं ज्ञेयम् । पृथिव्यान्तु लौहकांस्यकाष्ठ-प्रस्तरादिषु तु नाना ध्वनिभेदोऽपि प्रत्यक्षः । वायावपि हा हा सन्-सन् शब्दश्श्रुतिः ।

वाय्वनुप्राणनादग्निः ॥११॥

वायुना सहकारिकारणेन प्राणाख्येनाग्निपरमाणूनामनुप्राणनात् स्थूलाग्निरूपकार्योत्पादनानुकूलसामर्थ्याधानादग्निपरमाणूपादानको---ऽग्निर्जन्यते ।

तदनुप्रवेशात्स्पर्शो द्रव्यान्तरसंयोगादुष्णता ॥१२॥

तस्य वायोः सूक्ष्मस्याग्नावनुप्रवेशाद् वह्नौ स्पर्शः आकाशानुप्रवेशाच्छब्दोऽपि प्रतीयते । वायोस्तु स्पर्शोऽनुष्णाशीतः किन्तु द्रव्यान्तराग्निना संयोगादुष्णो जायते । अग्ने रूपन्तु स्वाभाविको गुणः । तस्मादेव-कारणात् रूपं चक्षुषा, तथा चाग्नेरुष्णता वायुसंयोगजन्यत्वाद्वायोरेव त्वगिन्द्रियेणैव गृह्यते । तस्मात्खण्डिते "तेजस उष्णता, अप्सु शीतता" इति काणादे सूत्रे द्वे । पृथिव्यां गन्धइव अप्तेजसो रसरूपयोरेव व्यवस्थितत्वात् उष्णताशीततयोर्वायुसंसर्गजन्यत्वादव्यवस्थिततैव ।

तस्य च प्रकाशमानता प्रकाश्यसंयोगे ॥१३॥

तस्य प्रकाशस्वभावस्यापि तेजोरूपस्य प्रकाशमानता प्रकाश्ययोर्जलपृथिव्योरन्यतरेण संयोग एव भवति नान्यथा ।

अत एवेन्द्रधनुरादय. ॥१४॥

प्रकाश्यस्य जलस्य सम्बन्धादेव च तेजोगतानि सप्त विधान्यपि रूपाणि इन्द्रधनुषि दृश्यन्ते । यथा च पृथिव्याः संयोगादेव जगति सप्तविधानि रूपाणि दृश्यन्ते ।

तदनुगृहीतैर्जलपरमाणुभिर्वाष्पम् ॥१५॥

ताभ्यां वाय्वग्निभ्यामनुगृहीतैरुपकृतैर्जलपरमाणुभिर्वाष्पं समुत्पद्यते महाकाशव्याप्तैः । अत एवान्तरिक्षे सूक्ष्मजलसमुद्र इति महाभाष्ये कैयटे स्थानेऽन्तरतमे सूत्रे ध्वनितम् ।

तदेवाऽऽश्यानं मेघाः ॥१६॥

तदेव वाष्पं कालव्यवधानेन आश्यानं किञ्चिद् घनीभूतं मेघा भवन्ति ।

ते प्रावर्षन् जलं व्यक्तशब्दशीतस्पर्शरूपरसद्रवत्वस्नेह-युतम् ॥१७॥

ते मेघा जलं प्रावर्षन् तज्जलं स्वगुणयुतं भवत्येव वायुसंयोगात् शैत्यद्रवत्वस्नेहगुणाश्च व्यक्ता भवन्ति, इति जलस्य स्वभावः । सूक्ष्मतरद्रव्यान्तराकाशवाय्वग्नीनामनुप्रवेशात्तु शब्दस्पर्शरूपयुतमपि जातम् । इदानीं व्यक्तास्ते गुणाः द्रव्यान्तरसम्बन्धात् । तस्मादेव जलस्य शैत्यस्य न रसनया ग्रहणमपितु त्वगिन्द्रियेण तथैव द्रवत्वस्य स्नेहस्यापि त्वगिन्द्रियेण ग्रहणम्

तदनुगृहीतपार्थिवपरमाणुद्वयाद् द्वयणुकं ततस्त्र्य-णुकादि ॥१८॥

तेन जलेनानुगृहीताभ्यां संहन्यमानाभ्यां पार्थिवपरमाणुभ्यां द्वयणुकं जायते । ततस्तेभ्यस्त्र्यणुकमित्यादि ।

तज्जलं कर्दमीभूतं सूक्ष्मया कार्यया मृदा ॥१९॥

तज्जलं सूक्ष्मया त्र्यणुकादिरूपया मृदा मिश्रीभूय कर्दमीभूतं पङ्क इति मलिनमिति वा । तदेव हिरण्यगर्भः, अण्डं वेत्युक्तः ।

तस्य शोषस्नेहाभ्यां घनता ततो मृत्पिण्डः पृथिवी ॥२०॥

तस्य त्र्यणुकादिरूपपृथिवीसम्बन्धात्कर्दमीभूतस्य जलस्य तेजसा शोषे वाष्पीभूयापगमे किञ्चिदवशिष्टस्य च जलस्य स्नेहेन तत्रस्थायास्त्र्यणुकादिरूपायाः मृदो घनीभावे मृत्पिण्डः पृथिवीति विश्रुता । एवं ग्रहनक्षत्रादिरूपस्य खगोलस्यापि समुत्पत्तिः । अयमेव मनुमतानुसारेणाण्डस्य भेद उक्तः ।

सा शब्दस्पर्शरूपरसगन्धद्रवत्वकाठिन्ययुक्ता ॥२१॥

सा पृथिवी शब्दस्पर्शरूपरसंगंधयुक्ता भवति । गन्धं स्वगुणः किन्तु शब्दादयश्चत्वारस्तु आकाशादीनां सूक्ष्मतराणां तत्र प्रविष्टानाम् । काठिन्यन्तु वायुसंयोगादेव पृथिव्यामेवेति स्वभावः । तस्मात्त्वगिन्द्रियेणैव प्रतीतिः काठिन्यस्य । द्रवत्वमपि जलस्य सयोगाद्भवति । तच्च मृदतेजःसम्पर्केण तिरोहितं तीव्रतेजःसम्पर्केणैव समुद्भवति तद्यथा सिकतासुधाधात्वादीनां तीव्रतापेन द्रवत्वमाविर्भवति । गुण-

गुणिनोः नित्यसम्बन्धत्वात्पृथिव्यामाकाशस्य भावाच्छब्दोप्यस्तीत्य-पास्तं शब्दराहित्यं पृथिव्यां कणादगौतमाभिमतम् ।

पुनश्च वर्षणात्तस्यां सरःसरित्सागराः ॥२२॥

शोषितस्य तस्य जलस्य मेघरूपत्वमापद्यमानस्य पुनः वर्षणात् तस्यां पृथिव्यां सरःसरित्सागराः समुत्पन्नाः । वृष्टिप्रकारश्चोक्तोऽग्नि-पुराणे—

विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलम् ।
नालैर्निक्षिपतेऽभ्रेषु धूमाग्न्यनिलमूर्तिषु ॥१॥
मेघस्थाः प्रपतन्त्यापो वायुना समुदीरिताः ।
संस्कारं कालजनितं मैत्रमासाद्य निर्मलाः ॥२॥

इत्यादिभिः पद्यैः तत्र जलेनापूर्यमाणा गर्ताः सरांसि, महागर्ताः सागराः निम्नस्खलनवत्यः प्रणाल्यो नद्यो जाता इति । तथा पृथिव्यु-त्सेधाः पर्वताः । पर्वतोत्पन्नप्रपातेभ्यो भूमिस्रोतोभ्यश्च महानद्योऽनव-रतवहन्त्यः सागरं प्रति जाताः ।

संहननक्रियाद्वारा पञ्चमहाभूतानि ॥२३॥

इत्थं संहननक्रियाद्वारा पञ्चमहाभूतानि, आकाशवाय्वग्निजल-पृथिव्यो जातानि वर्तमानस्वरूपाणि ।

सर्वपूर्वभूतसंहतं परभूतम् ॥२४॥

अत्रोत्पत्तिक्रमेण पूर्वपरयोर्व्यवहारः । तेनाकाशवाय्वग्निजलानीति चत्वारि भूतानि पूर्वाणि । वाय्वग्निजलपृथिव्यः स्वस्वपूर्वं प्रति पराणि । तत्र यान्यपि परभूतानि तानि सर्वाण्यपि स्वस्वपूर्वभूतैः संह-तानि । पूर्वाणां परेषु सूक्ष्मत्वादनुप्रवेशात् । तत्र पृथिव्यां चत्वार्यपि आकाशवाय्वग्निजलानि संहतानि । तदेव पृथिव्या एतद्रूपं जातम् । न चेयं शुद्धा मृत् । तस्मादेव सर्वमहाभूतगुणयुक्ता । तथैव जले चत्वारो गुणाः, वह्नौ त्रयः, वायौ द्वौ । तस्मादेव महाभूतानीति कथ्यन्ते । आकाशस्तु स्वयमेव महत्तरत्वात् महाभूतमुच्यतेऽन्यैरननुप्रविष्टत्वा-च्छब्दगुणकमेव, सर्वाधारत्वाद् व्यापकतरत्वाच्च, किञ्च सर्वस्य जगतः कारणत्वादपि महाभूतमुच्यते । यत्तु वाय्वग्निजलपृथिवीषु न शब्दस्तथा चाग्निजलपृथिवीषु यथाक्रमं स्पर्शः स्पर्शरूपे स्पर्शरूपरसा

अपि स्वीया एव गुणा इति न्यायवैशेषिकयोर्मतं तदयुक्तम्। वाय्वग्निजलेषु हाहा चट्चट् बुदबुद् कलकलध्वनिश्रवणात् तथा च पृथिव्यामपि लौहकांस्यकाष्ठादिषु नानाध्वनिभेदश्रवणात्। तथा च परेषु पूर्वेषां सूक्ष्मत्वात्प्रवेशात् तेषामेव ते शब्दस्पर्शरूपरसाः गुणा न तु परेषाम्। अन्यथा स्वीयाश्चेद् गुणा तदा घ्राणेन गन्धस्येव शब्दस्पर्शरूपरसादीनामपि ग्रहणं स्यात्। रसनया गंधातिरिक्तानां शब्दस्पर्शरूपाणामपि रसस्येव ग्रहणं स्यात्। न च तथा, तस्मान्न ते स्वीया गुणाः तेषामग्न्यादीनां स्पर्शादयः। या तु शङ्कराचार्यस्य उपनिषदः त्रिवृत्करणमुपलक्षणं मत्वा पञ्चपञ्चीकरणप्रक्रिया, सापि पूर्णतया अयुक्ता, आकाशच्छेषचतुर्भूतानां स्थूलतरत्वाद् आकाशेऽप्रविष्टत्वान्नाकाशे चतुर्णां वाय्वग्निजलपृथिवीनामष्टमाष्टमांशाना योगः। तस्मादेवकारणात्पृथिव्यामेव पञ्चपञ्चीकरणत्वात्पञ्चैव गुणाः शदस्पर्शरूपरसगन्धाः, नान्येषु पञ्चपञ्चीकरणम्। तस्माज्जले चत्वार एवाग्नौ त्रय एव वायौ द्वावेवाकाश एक एव शब्द इति शङ्कराचार्योऽपि मन्यते। सर्वेष्वपि पञ्चपञ्चीकरणं स्यात्तर्हि पृथिव्यामिव सर्वेष्वपि पञ्च पञ्च गुणाः स्युः। न च तथेति शङ्करस्यापि मतम्। पञ्चपञ्चीकरणञ्चेन्नाकाशे शब्द एव वायौ शब्दस्पर्शाविव अग्नौ शब्दस्पर्शरूपाण्येव, जले शब्दस्पर्शरूपरसा एव। स्वसत्ताप्रधानत्वाच्चेदाकाशे शब्द एव, तथापि शेषेष्वपि स्वस्वसत्ताप्रधानत्वात्तत्तद्गुणोपलब्धिरेव स्यान्नान्येषां संहातानामिति, तस्मान्न पञ्चपञ्चीकरणमिति भावः।

पूर्वपूर्ववेष्टिताः पराः पराः क्रमेण ॥२५॥

पूर्वैः संहननोन्मुखैः सूक्ष्मैः परमाणुभिः पराः स्थूलाः परमाणवः परिवेष्टिताः। यथा वायोः परमाणवः आकाशपरमाणुभिः परिवेष्टिताः। आकाशपरमाणुभिर्वेष्टितवायुपरमाणुभिर्वेष्टिता अग्निपरमाणवः। तस्मादेवाग्निः स्पृश्यते। न चाकाशः स्पृश्यतेऽवेष्टितत्वावायुपरमाणुभिः। आकाशवेष्टितवायुतद्वेष्टिताग्नितद्वेष्टिताः जलपरमाणवः, तस्मादेव जलं दृश्यते च। न वायुर्दृश्यतेऽवेष्टितत्वादग्निपरमाणुभिः। आकाशवेष्टितवायु,-तद्वेष्टिताग्नि,-तद्वेष्टितजल-जलपरमाणुभिर्वेष्टिताः पृथिव्याः परमाणवः पूर्वैः संहताः। तस्मादेव पृथिव्यां सर्वे गुणाः।

न परमाणौ परमाणुप्रवेशोऽपरमाणुत्वापत्तेराभ्यन्तरत्वाभा-वाच्च ॥२६॥

न च परमाणोः पूर्वस्य परस्य वा भूतस्य परमाणौ प्रवेशो भवति । प्रवेशश्चेत्सावयवत्वादपरमाणुत्वापत्तिः । तस्मादाभ्यन्तरत्वाभावाच्च न प्रवेशः । पूर्वोक्तानुप्रवेशस्य तु स्थूलभूतस्य परमाणुद्वयमध्यावकाशे सूक्ष्मत्वात्प्रवेश एवार्थस्तदैव परिवेष्टनं सम्भवं पूर्वैः परेषाम् ।

परेषु पूर्वेषां प्रवेशो लोष्ठचणकसर्षपरजोजलवत् ॥२७॥

परस्थूलमहाभूतपरमाणुषु पूर्वसूक्ष्ममहाभूतपरमाणूनां प्रवेशस्तु यथा स्थूललोष्ठानां पुञ्जे लोष्ठद्वयमध्यावकाशे प्रविश्य चणकाः प्रतिवेष्टयन्ति लोष्ठान् । तथा चणकानपि सर्षपाः । सर्षपानपि रजांसि, रजांस्यपि जलम् । तथैव ज्ञेयम् ।

सर्वपूर्वभूतपरमाणुव्यवधानवान् परभूतपरमाणुद्वय-संयोगः ॥२८॥


द्वचणुकोत्पत्तिं वर्णयन्नुच्यते—यद् द्वचणुकमुच्यते तत्तु परमाणुद्वयस्य संयोगादेव । तत्रोच्यते यत्परभूतस्य द्वचणुकं तत्र समवेततदीयपरमाणुद्वयस्य संयोगः सर्वपूर्वसूक्ष्मभूतपरमाणुव्यवधानवान् भवति । न हि स्थूलस्य भूतस्य परमाणुद्वयस्य विशुद्धस्य संयोगो भवति । सूक्ष्मैः पूर्वैः परिवेष्टितत्वात् । यथोच्यते क्रमशः ।

अव्यवधानवदाकाशस्य ॥२९॥


आकाशस्य यद् द्वचणुकं तदव्यवधानवद् भवति, यतो हि नाकाशात्पूर्वं सूक्ष्मञ्च किञ्चिन्महाभूतमस्ति अभावत्वादन्यस्य ततः सूक्ष्मतरस्य परिवेष्टकस्याकाशपरमाणुद्वयस्यैव संयोगः । अत एवाकाशपरमाणुद्वयोपादानकमाकाशद्वचणुकं यथा.. इति ।

आकाश परमाणुव्यवधानवद्वायुर्द्वचणुकम् ॥३०॥


यद्वायोर्द्वचणुकं तत्समवेतवायुपरमाणुद्वयसंयोगान्तरे सूक्ष्मत्वात् प्रविष्टत्वादाकाशस्यैकः परमाणुर्विद्यते । आकाशस्य परमाणुभिः



चित्र संख्या १
चित्र संख्या २
चित्र संख्या ३
चित्र संख्या ४
चित्र संख्या ५
चित्र संख्या ६
चित्र संख्या ७
चित्र संख्या ८
चित्र संख्या ९




आकाशपरमाणवः
वायुपरमाणुरेकः



चित्र संख्या १


चित्र संख्या २




अग्निपरमाणुः

चित्र संख्या ३

चित्र संख्या ४




जलपरमाणुः



चित्र संख्या ५

चित्र संख्या ६




जलद्वचणुकं



चित्र संख्या ७


पृथिवीपरमाणुः

चित्र संख्या ८



जलस्य जलस्य

चित्र संख्या ९



पृथिव्याः

अग्नेः अग्नेः अग्नेः अग्नेः

परितोवेष्टितत्वाद् प्रत्येकस्य वायुपरमाणोः मीनवत्सागरे जलेन । तद्यथा चित्रे[1] तस्माद् वायुद्वचणुकं यथा चित्रे[2] इति ।

वायुपरमाणुद्वयाकाशपरमाणुत्रयव्यवधानवदग्निद्वचणुकम् ॥३१॥

तस्मादग्नेर्द्वचणुके समवेताग्निपरमाणुद्वयस्यान्तरे, क्रमशः आकाशस्यैको वायोरेकः आकाशस्यैको वायोरेकः आकाशस्यैको यथा चित्रे[3]—अग्निपरमाणुः । तथा चाकाशवेष्टितवायुतद्वेष्टिताग्नेः परमाणुर्यथा चित्रे[4]—

अग्निपरमाणुद्वयवायुपरमाणुचतुष्टयाकाशपरमाणुसप्तक व्यवधानवज्जलद्वचणुकम् ॥३२॥

तथा च जलस्य द्वचणुके समवेतजलस्य परमाणुद्वयस्य संयोगान्तरे संख्यायामग्नेर्द्वौ वायोश्चत्वारः आकाशस्य सप्त परमाणवो भवन्ति । यतो हि आकाशवेष्टितवायुस्तद्वेष्टिताग्निस्तद्वेष्टितो जलस्य परमाणुरेकः । यथा चित्रे[5]—

तस्माज्जलपरमाणुद्वयस्य संयोगान्तरे क्रमशः आकाशस्यैकः वायोरेकः आकाशस्यैकः अग्नेरेकः आकाशस्यैकः वायोरेकः आकाशस्यैको वायोरेकः आकाशस्यैकः अग्नेरेकः आकाशस्यैकः वायोरेकः ततः आकाशस्यैक इति यथा चित्रे[6]—

जलद्वचणुकं[7] इति ।

जलपरमाणुद्वयाग्निपरमाणुचतुष्टयवायुपरमाण्वष्टकाकाशपरमाणुपञ्चदशव्यवधानवत्पृथिव्याः द्वचणुकम् ॥३३॥

तथा च पृथिव्याः द्वचणुके समवेतपृथिव्याः परमाणुद्वयस्य संयो-

---

१. आकाशपरमाणुभिर्वेष्टितस्य वायुपरमाणोश्चित्रमेकसंख्याकमिह द्रष्टव्यम् ।

२. इह द्विसंख्याकं चित्रं द्रष्टव्यम् ।

३. इह त्रिसंख्याकं चित्रं द्रष्टव्यम् ।

४. इह चतुःसंख्याकं चित्रं द्रष्टव्यम् ।

५. इह पञ्चसंख्याकं चित्रं द्रष्टव्यम् ।

६. इह षट्संख्याकं चित्रं द्रष्टव्यम् ।

७. इह सप्तसंख्याकं चित्रं द्रष्टव्यम् ।

गान्तरेऽपि संख्यायां जलस्य द्वावग्नेश्चत्वारो वायोरष्टावाकाशस्य षोडश वा पञ्चदश परमाणवो भवन्ति । यतो हि आकाशवेष्टितवायुतद्वेष्टिताग्नितद्वेष्टितजलतद्वेष्टितः पृथिव्याः परमाणुरेको यथा चित्रे[1]

तस्मात्पृथिव्याः परमाणुद्वयस्य संयोगान्तरे क्रमशः आकाशस्यैको वायोरेकः आकाशस्यैकोऽग्नेरेकः आकाशस्यैको वायोरेकः आकाशस्यैको जलस्यैकः आकाशस्यैको वायोरेकः आकाशस्यैकोऽग्नेरेकः आकाशस्यैको वायोरेकः आकाशस्यैको वायोरेकः आकाशस्यैकोऽग्नेरेकः आकाशस्यैको वायोरेकः आकाशस्यैको जलस्यैकः आकाशस्यैको वायोरेकः आकाशस्यैकोऽग्नेरेकः आकाशस्यैको वायोरेकः आकाशस्यैक इति । यथा चित्रे[2]

तदन्तराकाशपर्यन्तानि स्रोतांस्युपवेदोक्तानि दोषधातुमल-गमनागमनमार्गाः ॥३४॥

तत्र परमाणुद्वयमध्यस्था येऽन्तराकाशास्तेऽपि, आयुर्वेदोक्तानि स्रोतांसि परमसूक्ष्माणि । ये खलु दोषा धातुमलानां गमनागमनमार्गाः । दोषाः वातपित्तकफाः । धातवस्तावद् रसरक्तमांसमेदोस्थिमज्जाशुक्राः सप्त । मलास्तावन्मूत्रपुरीषान्यदुष्टभावाश्च । तत्र पोषकतत्त्वानां परिणाममापद्यमानानां परमाणुपर्यन्ताभिसरणप्रणाल्यस्त एवान्तराकाशाः परमसूक्ष्माभिसरणमार्गाः । तैरेव प्रदुष्टभावाः मलीभूताः बहिर्निःसरन्ति इति मानवपिण्डस्रोतोनिर्देशो ज्ञेयः । नात्र महास्रोतसां विषये निर्देशः सुस्पष्टत्वादन्यत्र । तस्मादेव स्रोतोवैगुण्यं खवैगुण्यमिति पर्यायेणोच्यत आयुर्वेदे । तथैव चतुर्विधेऽ्वपि पिण्डजाण्डजस्वेदजोद्भिज्जेषु ज्ञेयानि । निर्जीवापि सृष्टिस्तथैव ।

इति सामान्येन निर्देशस्तदर्थाकृतिकल्पना च ॥३५॥

इति पृथिव्यप्तेजोवाय्वाकाशादीनां पञ्चमहाभूतानां विशुद्धानां हि सामान्येन संहनननिर्देश उक्तो वेदितव्यः । निर्देशार्था एव परमाणूनामाकृतिकल्पना कृता केवला ।

---

१. इह अष्टसंख्याकं चित्रं द्रष्टव्यम् ।

२. इह नवसंख्याकं चित्रं द्रष्टव्यम् ।

एषामेवक्रमनानात्वे संख्यान्यूनाधिक्ये च पदार्थभेदाः ।।३६।।

एषामेव परमाणूनां नानाक्रमरूपात्कारणात्तेषां सजातीयानां परमाणूनां संख्यान्यूनाधिकत्वेन च नाना पदार्थानामुत्पत्तिः । यथा काष्ठादिषु वाय्वाकाशपरमाणुबाहुल्यात्तदपेक्षयान्यपरमाणुसंख्यान्यूनत्वात्सुषिराधिक्यं तेन लघुत्वं जलपृथिवीपरमाणूनां संख्यान्यूनत्वाद् गुरुत्वहानिः । आकाशवायुपरमाणूनां न्यूनत्वेऽग्निपरमाणुरूपतन्मात्राणामाधिक्ये च संजाते स्वर्णताम्रादीनां तैजसानामुत्पत्तिः । संख्याधिक्येनाकर्षणाधिक्याद् गुरुत्वाधिक्यम् । तत्र रूपतन्मात्रात्मकश्च योऽग्नेः परमाणुः स सप्तविधरूपत्वात्सप्तविधः । यथा क्रमशः कपिशश्यावनीलहरितपीतपाटलरक्ताः, प्रकाशाभावात्तम इव सर्ववर्णाभावात्कृष्णः सर्वसममिश्रणाच्छ्वेतो यथा सूर्ये । तत्र पीतरूपतन्मात्राणां संयोगात्स्वर्णपीतपुष्पपर्णकाष्ठादीनामुत्पत्तिः । रक्तैस्ताम्ररक्तपुष्पादीनामुत्पतिः । तथा चान्यत्रापि तत्तद्वर्णवस्तुविषये ज्ञेयम् । तथा च जलपरमाणूनामाधिक्याद् द्रवाणामुत्पत्तिः । जलाग्निपरमाणूनामाधिक्येन स्नेहानां स्नेहद्रव्याणाञ्च तत्तद्वर्णानां सर्षपानाम् तेन तेषां ज्वलनं प्रदीपादिषु सम्भवति । पृथिवीवह्निपरमाण्वाधिक्येन चकमकादिप्रस्तरस्यारणिवृक्षादीनाञ्चोत्पत्तिर्येषामत्यल्पसंघर्षादेव ज्वाला प्रजायते । येन वनपर्वतादिषु दावानल इति प्रसिद्धः । तथैवान्येष्वपि द्रव्येषु विवेकिभिर्ज्ञेयम् । तस्मात्क्रमभेद एव पदार्थभेदकारकः । तेन पञ्चतत्त्वसिद्धान्तो यद्वेदोक्तो गौतमादिभिश्चोद्घोषितः न तस्य हानिः । यथा च प्राधान्येन तृतीयसूत्रे ध्वनितम् ।

एष्वे पञ्चसु नव्यभौतिकवैज्ञानिकैर्विश्लेषितानां शताधिकतत्त्वानामन्तर्भावः ।।३७।।

एष्वेव पञ्चसु महाभूतेषु क्षित्यप्तेजोमरुद्व्योमसु आधुनिकभौतिकवैज्ञानिकैर्विश्लिष्य विश्लष्य प्रमाणितानां शताधिकतत्त्वानामन्तर्भावः पूर्णरूपेण भवति । न चैतानि शताधिकानि तत्त्वानि सन्ति । अपि तु पूर्वोक्तप्रकारेण परमाणूनां क्रमभेदात्ते नाना पदार्था एवेति मे मतिः, संख्यावत् सर्वेषां कठिनपदार्थानां पृथिवीतत्त्वेऽन्तर्भावः पार्थिवत्वात् । सर्वेषां तरलानामौदकत्त्वाज्जलेऽन्तर्भावः । सर्वेषां वाष्पाणां वायव्यत्वात् वायावन्तर्भावः । विद्युदिति शक्त्याख्यमग्नि-

तत्त्वम् एषां चतुर्णां स्थितिक्रियाधारः शब्दाश्रयश्च पञ्चममाकाशतत्त्वम् । यः कश्चिदपि नास्तिकः सर्वथैवाविचारयन् यदि प्राच्यवेदमतं खण्डयति निन्दनीयोऽस्ति सः ।

सामीप्यमेव संयोगः स्पर्शो वा न लग्नता पर्यन्ताभावात् ॥३८॥

यस्तु परमाणूनां संयोगः स्पर्शो वोक्तः स सामीप्यमात्र एव ज्ञेयो न तु लग्नता, पर्यन्ताभावात् । पर्यन्ताश्चेत्सावयवत्वान्न सः परमाणुः । आकाशपरमाणूनां वा व्यवधानत्वान्नापरचतुर्भूतपरमाणुषु परस्परं संयोगः स्पर्शात्मकः । आकाशे स्पर्शगुणाभावात्तु स्वयमेव न लग्नतेति पर्यन्तता स्वीकारपक्षेऽपि ज्ञेयम् ।

प्रेरणया क्रमहानिराघातः समीप्यहानिः खण्डनम् ॥३९॥

यत्तु खण्डनमाघातश्च दृश्यते तत्तु प्रबलस्य पातेन प्रेरणया वा परमाणूनां क्रमहानिरेवाघातः । सामीप्यहानिरेव खण्डनम् ।

यो लोको यद्भूतप्रधानस्तेन तद्व्यपदेशः संहतत्वेऽपि ॥४०॥

यस्मिन् लोके यद्भूतप्रधानं वर्तते तेनैव भूतेन सो व्यपदिश्यते । यथा तेजसा सूर्यलोकः जलेन चन्द्रलोकः ।

ततः पाञ्चभौतिकं सर्वम् ॥४१॥

सर्वेषु च लोकेषु तत्तत्प्रधानीभूतभूतव्यवहारेऽपि प्रधानाप्रधानभूतसमारब्धत्वात्सर्वमेव पाञ्चभौतिकम् ।

नाकाशीयलोकशरीरादिकं रूपस्पर्शशून्यत्वात् ॥४२॥

आकाशात्मकभूतकार्यं शरीरं लोको वा नास्ति । लोकशरीरादिकस्य भोगसाधनत्वेन भोगार्थत्वात् । आकाशरीरस्याकाशलोकस्य च रूपस्पर्शरसगन्धशून्यत्वेन भोगसाधनत्वासम्भवात् ।

सजातीयोत्कृष्टभूतं प्रति धावन्ति भूतानि, आकर्षणात् ॥४३॥

सर्वाणि भूतानि स्वजातीयोत्कृष्टभूतं प्रति तद्भूतप्रधानलोकं प्रति वा धावन्ति । तेनाकृष्टानि च सन्ति । यथाग्निः सूर्यं प्रति धावत्यूर्ध्वमाकृष्टः । एवं समुद्रजलं जलात्मकं चन्द्रं प्रतिधावति प्रोच्छलनपर्वणि, तस्य कारणं चन्द्रस्य पर्वण्यत्यन्तसान्निध्यं सर्वकलापूर्णता च । पृथिविविकारश्च लोष्टादिकं रेणवश्च वियति विक्षिप्ताः पृथिवीमेव गच्छन्तीति । तदेवमुक्तं स्थानेऽन्तरतमः सूत्रे भाष्ये "पृथिवी-

विकारः पृथिवीमेव गच्छत्यान्तर्यतः ।" "अब्विकारोऽप एव गच्छत्यान्तर्यतः ।" "ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यंतः ।" इति यथा च तत्रैव कैयटः—"अन्तरिक्षे सूक्ष्मो जलसमुद्रः" इति तं प्रत्येव नित्यमापो धावन्ति भूतलात् ।

सत्यपि रूपे वह्निगुणे, न जलपृथिव्योत्पत्तेः प्राक् प्रतीयते स्वाधारस्वव्यञ्जकाभावात् ॥४४॥

यद्यपि रूपं वह्निगुणस्तथापि जलपृथिव्योरुत्पत्तेः प्राक् सत्यपि तद्धर्मिण्यग्नौ न तद्गुणरूपं व्यक्तं भवति आधाराभावात् । जलपृथिव्यावाश्रित्यैव रूपं प्रतीयते इति व्यञ्जकाभावान्न प्रतीतिः ।

प्रकाशो दृश्यते तावद्यावत् त्रसरेणुमाश्रितः ॥४५॥

यस्त्वाकाशे प्रकाशो दृश्यते स तु तत्राकाशे उड्डीयमानजलपृथिवीत्रसरेणून् विस्तृतानाश्रितः सन्नेव दृश्यते ।

शब्दस्पर्शावपि विज्ञेयौ द्रव्यान्तरसंयोग एव ॥४६॥

रूपवदेव शब्दस्पर्शविषयेऽपि जानीयात् । यन्न तावपि जलपृथिव्यौ विना क्वचिदुपलभ्येते, आधाराभावात् । शब्दस्पर्शप्रतीत्योस्तु आधार आवश्यकः । स चाधारस्तु जलपृथिव्योर्मूर्तद्रव्ययोरेव सम्भवति ।

स्नेहशैत्यद्रवत्वानि लभ्यन्ते संहतोदके वायुयोगात् ॥४७॥

जले संहते वायुयोगादेव स्नेहशैत्यद्रवत्वानि लभ्यन्ते तस्मादेव त्वगिन्द्रियेणैवैषां ग्रहणं भवति । तथैव कठिनता मृदः ।

शैत्यमुष्णता च वायुना वाह्येते ॥४८॥

जलस्य शैत्यमग्नेश्चोष्णता वायुना वाह्येते, तेनैवाभिव्यज्येते च स्पर्शगुणवत्त्वात् ।

इमानि पञ्चमहाभूतानि निर्जीवसृष्टिः, निर्जीवसृष्टिः ॥४९॥

इमानि आकाशवाय्वग्निजलपृथिव्यः क्रमशः सृष्टानि तत्तद्गुणयुक्तानि वर्णितानि । इयत्पर्यन्तं हि निर्जीवसृष्टिः । अतोऽग्रे सजीवसृष्टिक्रमोऽपि प्रकरणवशाद् वर्ण्यते ।

इति द्वितीये पादे प्रथमोऽध्यायः ।

अथ द्वितीये पादे द्वितीयोऽध्यायः

एतेभ्यः सर्व ऋतवः ॥१॥

एतेभ्यः एव महाभूतेभ्यः सर्वे वसन्तादय ऋतवो जाताः ।

वायोर्वसन्तः प्रथम ऋतुराजः ॥२॥

सर्वतः पूर्वं वायुना प्राणेन प्रथमर्तुर्वसन्तो जातः । यतो हि प्राण एव शक्तिस्तस्मात्तज्जे वसन्तेऽभिनवाः स्फूर्तिः शक्तिश्च जायते । वीर्यबलानन्दोपचयश्च भवति । तस्मादेव कारणात् प्रथमजातत्वात् सर्वश्रेष्ठत्वादृतुराजोऽयं कथ्यते कविभिः । वायोरनुष्णाशीतत्वात्पूर्णानुष्णाशीतोऽयमृतुः वायोश्च रजोगुणत्वाद्रागात्मकः प्रेरणात्मकश्च । सर्वप्रथमजातत्वाद्वसन्तादेव वर्षस्यारम्भः । इति सर्वथा वैज्ञानिकं मतमार्याणाम् ।

ततोऽग्नेर्ग्रीष्मर्तुः ॥३॥

ततो वायुरूपात्प्राणादग्निरुष्णतात्मक उद्भूतो यथापूर्वं वर्णितं ग्रीष्म उष्णर्तुः जातस्तत्तु स्पष्टमेव ।

ततस्त्रिरूपाज्जलाद्वर्षाशरद्धेमन्ताः ॥४॥

ततो जलाद्वर्षाशरद्धेमन्तास्त्रय ऋतवो जाताः । कथमित्युच्यते । त्रीणि रूपाणि यस्य तत्त्रिरूपं जलम् । कानि च त्रीणि रूपाणि ? वाष्पं द्रवजलं हिम इति । तत्राग्नावुद्भूते तदुष्णतया पूर्वव्याख्यातं वाष्पीभवनं ततो मेघाः । तैरेव वृष्टिर्जायते सैव वर्षा । वर्षातो जलाधिक्याच्छैत्याधिक्यं तेन शरज्जायते । पुनश्च जले तृतीयरूपमापन्ने घनीभूते हिमपाते हेमन्तर्तुः प्रजायते । हिमस्यान्तो मध्यं हेमन्तः पृषोदरादित्वात्साधुः । तथा च 'सन्तो वनान्तं गता' इत्यादौ मध्यार्थेऽन्तशब्दप्रयोगात् ।

ततः पृथिव्याः शिशिरः ॥५॥

ततः सर्वतः पश्चात्पृथिव्याः शिशिरर्तुर्जातः, अल्पशीतः । तदैव पृथिवीप्रभावतः सर्वं वस्तु पृथिवीरूपं गच्छति नाशमित्यर्थः । शॄ धातोर्हि नाशार्थे प्रयोगात् । शीर्यते सर्वं यस्मिन्नृतौ स शिशिर इति ।

नाकाशात्कोऽपि निर्विकारत्वात् ॥६॥

निर्विकारत्वान्नाकाशात्कोऽपि जायत ऋतुरिति ।

अनेकलक्षवर्षं हि, ऋतूनामयं क्रमः ॥७॥

एषामृतूनामयं क्रमोऽनेकलक्षवर्षपर्यन्तं प्रचलितः ।

एषामेकचक्रं हि वर्षैकं पृथिवीतले ॥८॥

एषामृतूनामेकचक्रं वसन्ताच्छिशिरपर्यन्तमेकवर्षमुच्यते पृथवीलोके । द्वितीयवसन्तात्पुनर्द्वितीयवर्षारम्भः ।

तच्चक्रं पृथिव्यार्कपरिक्रमया ॥९॥

ऋतूनां षण्णामिदं चक्रं पृथिव्याः सूर्य्यस्य परिक्रमणेनापद्यते । परिक्रमणेन वाय्वादीनां क्रमशो शक्तिप्रधान्यात् ।

एभिः पाञ्चभौतिकभावानां षड्भावविकारा जायन्ते, अस्ति-जायते-वर्धते-विपरिणमतेऽपक्षीयते-विनश्यतीति जीवयोगात् ॥१०॥

एभिः षड्ऋतुभिर्वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरैः जीवयोगात्प्राणयोगाच्च षड्भावविकारा जायन्ते। तैरेव भावविकारैः स्थावरजंगमानामुत्पत्तिनाशक्रमः ।

असाम्प्रतो वार्ष्यायणेः क्रमः ॥११॥

यत्तु जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति वार्ष्यायणिमुनेः क्रमस्तन्न मे रोचते । यतो हि सर्वस्यापि कारणरूपेण सत्त्वं जन्मनः प्रागेव भवति । किञ्च सत्तारूपायाः विक्रियायाः सर्वेष्वपि भावेषु सामानाधिकरण्यं सर्वविकारप्राथम्यं विना नोपपद्यते ।

अतः पूर्वं किञ्चिद्वर्तते तदेव पश्चात्किञ्जिज्जायते । न ह्यसतोऽभावाद्वा किञ्चिज्जायते । अत एव परमाणुरूपा प्रकृतिरव्यक्ता सत्यस्ति । तद्विकाराः पञ्च भूतानि जायन्ते तान्येव प्रकृतिविकृतिरित्युच्यन्ते । परमाणूनां विकृतिः षड्भावविकाराणां प्रकृतिरिति भावः । तत्र प्रथमो विकारः पाञ्चभौतिकानि बीजानि नानारूपाणि जीवयोगात् सजीवानि शनैः शनैरुपचितानि सन्ति इति प्रथमो विकारः । तदाङ्कुरो जायते । ततोऽङ्कुरस्य वर्धनम् । तदा पूर्णवृद्धि सम्प्राप्य परिणताः परिपक्वाः, ततोऽपक्षयः, ततो नाशः । यदि च बीजच्युतिस्तद्गलनमेव परिणामस्तर्हि विपरिणमते जायते इति क्रमः स्यात् । न हि बीजच्युतिं विनाङ्कुरो जायते । ततो न किंचित्कालं प्रतीक्षते किन्तु सततं वर्धते । यत्तु अस्तीति सत्तामात्रावधारणं तत्तु वृद्धिक्षयकालेऽप्यवधार्यते । नासत् वर्धतेऽपक्षीयते नश्यति वा । जायतेऽङ्कुरः, अस्ति अङ्कुरः, विपरिणमते बीजम् । वर्धतेऽङ्कुर इति विचित्रः क्रमः । तस्मादस्ति बीजमिति प्रथमो विकारस्ततो जायतेऽङ्कुरः स एव वर्धते विपरिणमते अपक्षीयते विनश्यतीति क्रमः इष्टः ।

वसन्ताद् बीजसंघातो ग्रीष्मादेवाङ्कुरोद्भवः ।
वर्षया वर्धनं जाताः शैत्यात्परिणतिं गताः ॥१॥
हेमन्तशिशिराभ्यान्तु क्षयनाशौ समासतः ।
इत्येभिः ऋतुभिः षड्भिः षड्विकारा इमेऽभवन् ॥२॥

सजीवसृष्टिं वर्णयति । सर्वतः पूर्वं हि बीजानां सत्तावश्यकी । अत एव जीवयोगाद् वसन्ताद्बीजानामुपचयपरमाणुक्रमविशेषाज्जातस्तदा बीजानि सन्ति इति प्रथमो विकारः । वसन्तो हि वीर्यबलोपचायकः प्रथमो जातः । ततो ग्रीष्मादूष्मणोऽङ्कुरो जातः । ततो वर्षया तेषां वृद्धिर्जाता । ततः शरदृतोस्तु विपरिणामो नाम परिपाको जातस्ततो हेमन्ते हिमपातादपक्षयः । ततः शिशिरे नाशो जायते । एभिरिति षड्भिः ऋतुभिरिमे षड् विकाराः जाताः । तत्र दीर्घायुषां वनस्पतीनां पत्रपुष्पफलादिनाशः । एकवर्षायुषां तु नाश एव ।

अल्पायुषान्तु प्रत्यहोरात्रं सर्वर्तुसत्ता सर्वर्तुसत्ता ॥१२॥

कथं तर्हि कतिपयमासस्थितिकानामल्पायुषां वनस्पतीनां तत्क्रमः । न सर्व ऋतवस्तदायुषि सम्प्राप्ता भवन्ति । अत उच्यते, नित्यं प्रत्य-

होरात्रं सर्वषड्ऋतवो जायन्ते । ब्राह्मे मुहूर्ते उषसि, प्राणवायुना वसन्तस्तस्मादेव तस्मिन् कालेऽभिनवा शक्तिः स्फूर्तिश्च जायते, वीर्यबलानन्दाश्चानुभूयन्ते, सर्ववनस्पतयोऽपि प्रफुल्ला पुनरुज्जीविता दृश्यन्ते । दिवसि सूर्यतापाद् ग्रीष्मः । सूर्य्यास्ते प्रतिश्यायरूपाणां सूक्ष्मजलविन्दूनां पातो वर्षा । गतायामल्परात्रौ शरद् । अर्द्धरात्रौ शैत्याधिक्याद्धेमन्तः । ततः शिशिरः नाशकालः । उषसः प्राक् मुमूर्षूणां काल उच्यते लोके । प्रायः तस्मिन्नेव काले शक्तेरतिक्षयात्प्राणवियोगो जायते । अतीते च तस्मिन् काले पुनर्ब्राह्मे काले आयाते वसन्तावृत्तितो वीर्यबलोपचयात् पुनरुज्जीवनं भवति सर्वेषां मुमूर्षाणामपि ।

इति जगदीशाचार्यविरचिते परमाणुदर्शने द्वितीयोऽध्यायः

द्वितीयः पादश्च ।

अथ तृतीये पादे प्रथमोऽध्यायः

प्राणिनो द्विविधाः योनिजायोनिजभेदात् ॥१॥

इदानीं पञ्चमहाभूतसृष्टेरनन्तरं तथा च तेभ्यः षड्ऋतूत्पत्त्यनन्तरं चराचरभेदनिर्देशपूर्वकं तदुत्पत्तिः वर्ण्यते । सर्वे प्राणिनः कोटिद्वये विभक्ताः—योनिसमुत्पन्ना अयोनिसमुत्पन्नाश्च ।

योनिजास्तु पिण्डजाण्डजभेदतः पुनर्द्विधा ॥२॥

तत्र ये योनिजास्ते द्विधा भवन्ति—पिण्डजा अण्डजा इति । पिण्डजा एव जरायुजा उच्यन्ते, जरायुणाच्छन्नत्वात् ।

तत्र पिण्डजाः पशुमानवाः ॥३॥

तत्र पशवो मानवाश्च पिण्डजा जरायुजा वोच्यन्ते जरायुर्गर्भशिशुवेष्टनं, तद्वेष्टितं शिशुपिण्डं योनेः जायते । तस्माज्जरायुजाः पिण्डजाः वा कथ्यन्ते ।

अण्डजाः पक्षिणः सरीसृपादयः ॥४॥

येऽण्डरूपेण पूर्वं योनेर्जाताः पश्चात्तद्भेदात्समुत्पन्नास्तेऽण्डजाः । यथा पक्षिणः सर्पादयश्च द्विर्जातत्वात् द्विजाश्चोच्यन्ते । पूर्वं हि योनेः अण्डानि जायन्ते । ततः कतिपयदिवसपर्यन्तं तानि सेव्यन्ते । तत्र गर्भनाशभयम् । न सर्वाण्यण्डानि सफलानि भवन्ति । ये दोषमापद्यन्ते मात्रन्यस्पर्शादिभिस्तानि शुष्यन्ति अफलानि जायन्ते । यान्यदुष्टानि तेभ्यः पुनरुद्भिद्य जायन्ते । तस्माद् द्विजा उच्यन्ते । पिण्डजास्तु योनेर्निष्क्रमणानन्तरमेवोपलभ्यन्ते न च नाशभयमिति न ते द्विजाः । यद्यपि त्रैवर्णिका मानवा अपि द्विजा उच्यन्ते, तथापि ते संस्काराद् द्विजाः, न तु वस्तुतो योन्यण्डोभयजन्मसम्बन्धेनेति ।

अयोनिजाश्चापि स्वेदजोद्भिज्जभेदाद् द्विधाः ॥५॥

ये त्वयोनिजास्तेऽपि द्विधाः स्वेदजा उद्भिज्जाश्च ।

स्वेदजा यूकामत्कुणादयः ॥६॥

यूकामत्कुणा दंशमशकमक्षिकादयश्च स्वेदोत्पन्नत्वात् स्वेदजा उच्यन्ते । अत्र स्वेदो देहमलं बाह्यमलञ्चोच्यते ।

उद्भिज्जा लतागुल्मवृक्षादयो वनस्पतयश्चतुर्विधाः ॥७॥

ये पृथिवीमुद्भिद्य जातास्ते लतागुल्मवृक्षादयो वनस्पतयश्चतुर्विधाः भवन्ति । यथा चोक्तं चरके सूत्रस्थाने—

भौममौषधमुद्दिष्टमौद्भिदं तु चतुर्विधम् ।
वनस्पतिर्वीरुधश्च वानस्पत्यस्तथौषधिः ॥१॥
फलैर्वनस्पतिः पुष्पैर्वानस्पत्यः फलैरपि ।
ओषध्यः फलपाकान्ताः प्रतानैर्वीरुधः स्मृतः ॥२॥

तत्र वनस्पतिर्यथा गूलरः । वानस्पत्यो यथा आम्राः । ओषधिर्यथा गोधूमादयः । वीरुधो यथा कूष्माण्डमल्लिकादिलताः ।

पूर्वं ह्युद्भिज्जा जाता ऋतुप्रभावतः ॥८॥

सर्वतः पूर्वं वसन्तग्रीष्माभ्यां पृथिवीमुद्भिद्य लतागुल्मवृक्षादीनामङ्कुराः जाताः । ततो वर्षादिभिर्वर्धनादिकम् । वर्षया अंकुराणां वृद्धिः । पूर्णवृद्धिं सम्प्राप्य शरदि परिपाकः । हेमन्तेऽपक्षयस्ततः शिशिरे नाश इति ।

अनेकलक्षवर्षमुद्भिज्जानामयं क्रमः ॥९॥

अनेकलक्षवर्षपर्यन्तमुद्भिज्जानामयं षड्विकारात्मकः क्रमः प्रचलितः ।

तत्पङ्काद्धि स्वेदजाः ॥१०॥

लतादीनां वनस्पतीनां शीर्णपत्रपुष्पफलादीनां वर्षाजलेनाग्निमिश्रेण क्वथनाद्यः सोष्मा पङ्को जातस्स एव मलभूतः स्वेदः । तत एव जीवयोगात्कीटाः दंशमशकादयः जातास्त एव स्वेदजा इति । तेषां प्रथमरूपममीवेत्युच्यते वेदे ।

अण्डजाः पिण्डजाश्चापि कथं जाता इति न तर्क्यते ॥११॥

सर्गादौ कथञ्चाण्डजाः पिण्डजाश्च जाता इति सम्यक् नानुमीयते, नानुमातुं शक्यम् ।

नास्तिकानान्तु विकाशात्परो न मार्गः ॥१२॥

नास्ति ब्रह्म परमेश्वर इति मतं यस्य स नास्तिकः । तेषां तु स्वेदजेभ्य एव विकाशात् प्रथममण्डजाः जातास्ततः पिण्डजा जाता इति मतं, न चान्यो मार्गः ।

आस्तिकानान्तु युवा सृष्टिश्चतुर्वेदविशारदाः ॥१३॥

आस्तिकानां ब्रह्मस्वीकर्तॄणां मते युवावस्थापन्नानि मिथुनानि अण्डजपिण्डजानां पूर्वजानां समुत्पन्नानि, तत्र पिण्डजेषु मानवाश्चतुर्वेदविशारदा उत्पन्ना इति ज्ञेयम् । नान्यथा ज्ञानसम्भवः इति दयानन्दः ।

त एव पुराणेषु मनुमरीच्यादयः ॥१४॥

त एव पुराणेषु सर्गप्रवर्त्तका मनुमरीच्यादयोऽन्ये च दक्षादयः प्रजापतयः नारदादयः सनकादयश्च ऋषयो ब्रह्मणो मानसपुत्राः प्रसिद्धाः ।

अमैथुनी मिथुनाभावात् ॥१५॥

साण्डजपिण्डजानामुत्पत्तिरमैथुनीभूता, सर्वतः पूर्वं मिथुनानामभावात् भूमावेव तेषां गर्भाशयाः, नान्यथा रक्षणमभविष्यत् । उद्भिज्जवज्जाता इति तर्क्यते ।

ब्रह्मणस्तदशङ्क्यं सर्वशक्तिमत्त्वात् ॥१६॥

ब्रह्मणो हि सर्वशक्तिमत्त्वात् न शङ्का कार्या, अन्यथाऽनुपपत्तेश्च ।

विकाश इति चेदद्यापि दृश्येत ॥१७॥

ननु विकाश एव मार्ग इति चेत्तर्हि वानराः अद्यापि लाङ्गूलानि घर्षयित्वा मानवरूपा कथन्न जायन्ते कस्तान् तथा कर्तुं प्रतिषेधति । ब्रह्मवादिनान्तु मिथुनोत्पत्यन्तरमनावश्यकत्वान्न पुनरमैथुनी सृष्टिः ।

तत्पश्चान्मैथुनी सृष्टिः ॥१८॥

मिथुनोत्पत्त्यनन्तरं मैथुनी सृष्टिर्जाता सा दृश्यत एव—

आकृत्यङ्गक्रियारागैर्मानवो ह्येकजातिकः ।
देशकालतुसंयोगाद्दोषभेदयुतो भवेत् ॥१॥

दोषैः प्रकृतिभेदस्तु मानवानां हि जायते ।
वातलाः पित्तलाः केचिच्छ्लेष्मलाश्च तथापरे ॥२॥

तत्तद्दोषैः प्रकुपितैरामया बह्वः स्मृताः ।
ते सर्वेऽपि चिकित्स्यन्ते तत्तद्दोषघ्नभेषजैः ॥३॥

देशकालतुभेदैस्तु वेशो भाषाऽशनं तथा ।
आचारा नियमाश्चैव भिद्यन्ते नात्र संशयः ॥४॥

तस्माद् द्रोहो न कर्तव्यो मानवैर्भुव्यसंशयम् ।
परस्परं तथैवेर्ष्या गर्हिता जननाशिनी ॥५॥

ज्ञानन्यायौ तथा भावसुविधे नत्रि संगताः ।
शत्रवो नृसमाजेऽस्मिन्निति वेदानुशासनम् ॥६॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा युध्यन्ति चेद् दृढैः ।
अरिभिः पूर्वनिर्दिष्टैस्तदा शं शान्तिसम्भवः ॥७॥

व्यक्तीनामुन्नतिस्तावज्ज्ञानकर्माभ्युपासनैः ।
ब्रह्मचर्यगृहस्थाद्यैराश्रमैरिह जायते ॥८॥

ब्रह्मचर्येऽर्जयेज्ज्ञानं गृहस्थः कर्मणां विधिम् ।
वानप्रस्थ उपासीताधिकारी संन्यसेत्ततः ॥९॥

वर्णाश्रमव्यवस्थान्तु नाचरन्ति यदा जनाः ।
सुखशान्ती न वर्तेते मोक्षश्चापि न लभ्यते ॥१०॥

वर्णाश्रमव्यवस्था तु वेदेषु विहिता हिता ।
यया सर्वे जनाः सन्ति सुखिनो नात्र संशयः ॥११॥

विद्यया ब्राह्मणश्चाहं रक्षणेन च क्षत्रियः ।
वणिज्यायत्नतो वैश्यः सेवया शूद्रतां गतः ॥१२॥

तस्माल्लोकैर्वर्तितव्यं यथा वेदानुशासनम् ।
प्रेयः श्रेयश्च प्राप्येते मनुना प्रतिपादितम् ॥१३॥

स एव पञ्चशरोत्पत्तिकालः ॥१६॥

अण्डजपिण्डजानाममैथुनीसृष्टचनन्तरं मैथुनादुत्पत्त्यर्थं हि अमैथुनानां हृदये पूर्वं पञ्चशरस्य कामदेवस्योत्पत्तिर्जाता। स एव कालस्तस्योत्पत्तिकालः। तत्र कामो मैथुनीसृष्टचर्थं स्वभावः। तस्मान्न चैषा कामुकता दोषः, स्वभावत्वात्। समाजव्यवस्थाभङ्गकृत्तु दोष एव काल्पनिकः, तत्र तस्य दमनं विधेयम्। मोक्षेऽपि बाधकं भवति रागकारित्वात्।

तथा च श्लोकाः—

कामो देवः सर्वदेवेषु राजा
चक्षुर्देवस्तस्य मन्त्री प्रधानः।
श्रोत्राद्यास्तं देवमुद्दीपयन्तो
नित्यं सज्जास्तस्य ते चाटुकाराः ॥१॥

किं कान्तानां भवेदङ्गं यदनङ्गानधिष्ठितम्।
केशेभ्यः पादपर्यन्तं प्रत्यङ्गं सोऽधितिष्ठति ॥२॥

भवेच्चेन्न कामो रतिश्चापि न स्या-
न्नवा झङ्कृतिश्चित्ततन्त्रीष्वमूल्या।
न शैले वने वा वसन्ते च शोभा
न वानन्दपूर्णं भवेच्चापि विश्वम् ॥३॥

नास्ति कश्चिन्नरो लोके नातुरः कामतो भवेत्।
यौवने पण्डितं मूर्खं सर्वं संक्लेशयत्ययम् ॥४॥

कामवृद्धिस्तु विज्ञानाज्जायते ह्युत्तरोत्तरम्।
मूर्खास्त्वकामिनः प्रायो ह्यभावाज्ज्ञानकालयोः ॥५॥

परित्यज्य षण्ढं न कोऽप्यस्ति लोके
न कामेन विद्धं भवेद्यस्य चेतः।
वशीकृत्य तस्माद्धि तं कामजित् स्या-
न्महाकामजित्त्वन्यथा स्याद्धि षण्ढः ॥६॥

बाले वृद्धे तथा षण्ढे पुष्पसायकसायकाः।
तिष्ठन्ति निष्फलारम्भास्तेषु कामः पराजितः ॥७॥

युवावस्थां गताः सन्तो वीतरागाश्च पण्डिताः ।
जायन्ते कामिनो योगात् कामिनीभिर्न संशयः ॥८॥

लोकलज्जाभयाद् ये तु निवृत्ता औपरिष्टिकात् ।
रमन्ते नैव रामासु तच्चेतांसि, न विश्वसेत् ॥९॥

विषयाद्विनिवृत्तस्य त्यागिनोऽपि नरस्य चेत् ।
कामबीजं स्थितं चित्ते तत्प्ररोहति निश्चितम् ॥१०॥

प्रसिद्धं वीतकामत्वे युवानं नैव विश्वसेत् ।
नापि तस्य कुलस्त्रीणां पार्श्वे वासं प्ररोचयेत् ॥११॥

महात्यागी तपस्वी च शंकरो भुवि विश्रुतः ।
दृष्ट्वा तु मोहिनीरूपं श्रुतं कामातुरोऽभवत् ॥१२॥

दुष्करं निग्रहं मन्ये कामाभिमुखचेतसः ।
नात्र दोषो जनस्यास्ति स्वभावः प्रकृतेरयम् ॥१३॥

अनाप्य दुरवापाभ्यां पञ्चबाणः समाकुलः ।
मूढबुद्धिः कृतघ्नोऽयं नित्यप्राप्तमुपेक्षते ॥१४॥

आमन्त्रितस्त्वसन्तुष्टो निष्फलोऽन्यत्र धावति ।
विचित्रगतिको मूढो हरिणा साधु धिक्कृतः ॥१५॥

अभीष्टमप्राप्यनिवृत्य तस्मात्
सम्प्राप्तदैन्योऽन्यतिरस्कृतो वा ।
पुनश्च मूढो रतिमेति तस्मिन्
चित्ते स्मरन्तं कपटी मनुष्यः ॥१६॥

वशीकृत्य कामं जनः स्यादकामो,
वशीकृत्य कोपं तथास्यादकोपः ।
पराजित्य मोहं विमोहो नरः स्यात्,
परित्यज्य लोभं पुनः स्यादलोभः ॥१७॥

अधःपातकानां तदेषां निरासो,
विधेयोऽन्यथा शीघ्रपातो जनानाम् ।
यदेन्द्रोऽपि देवोऽपतज्जारकर्मा,
शृणुध्वं, तदा का कथा मानवानाम् ॥१८॥

युवानं मुमुक्षुं प्रति त्यागिनं यः
स्वदारादिसम्प्रेषणं ना विधत्ते ।

न कोऽप्यस्ति पापी जनस्तेन तुल्यः,
विधत्ते हविर्भुग्घवियोगमेव ॥१६॥

अनेकार्बुदवर्षं तु सृष्टिरेषानुमीयते ॥२०॥

एषा सृष्टिरनेकार्बुदवर्षपर्यन्तं तिष्ठतीति नव्यप्राच्यसर्वानुमानम् ।

पुनर्भवति प्रलयो लयसृष्टिचक्रविधानतः,

लयसृष्टिचक्रविधानतः ॥२१॥

पुनश्च लयसृष्टिचक्रविधानानुसारात् प्रलयो भवति ।

इति तृतीये पादे प्रथमोऽध्यायः ।

अथ तृतीये पादे द्वितीयोऽध्यायः

सृष्टिवर्णनं सारल्यार्थम् ॥१॥

ननु परमाणुजिज्ञासायां सृष्टिक्रमो वर्णितो न तु परमाणुस्वरूपवर्णनं कृतम् ? 'विनायकं प्रकुर्वाणो रचयामास वानरम्' इतिवदिति चेन्न, सृष्टिवर्णनं विना परमाणुस्वरूपवर्णनं न सम्भवति । यतो हि कस्मिन्महाभूते के के गुणाः, तेष्वपि के स्वकीयाः के च परकीया इति ज्ञानं विना नहि परमाणुस्वरूपवर्णनं समीचीनं भविष्यतीति सरलतयावगत्यर्थमेव पूर्वं सृष्टिक्रमवर्णनमनिवार्यमासीत् । विस्पष्टत्वायैवेदं सूत्रं पुनरुक्तम् ।

इदानीं परमाणुबोधसमयः ॥२॥

इदानीं सर्गवर्णनानन्तरं प्रलयवर्णनपुरस्सरं परमाणूनां स्वरूपवर्णनं प्रारभ्यते तद्बोधस्य समयः प्राप्तः । अतः सर्वसृष्टिप्रलयं वर्णयन्नुपक्रमे ।

अतिवृष्ट्या योनिजानां लयो विशेषेण ॥३॥

तत्र पूर्वमतिवृष्टया विशेषेण योनिजानां नाशः पञ्चत्वप्राप्तिर्भूता ।

अनावृष्ट्याऽयोनिजानां विशेषेण ॥४॥

तथैवानावृष्टया विशेषेण स्वेदजानामुद्भिज्जानाञ्च नाशः । सूर्य्यस्यातिसन्तापादुद्भिदां लतादीनां शुष्कीभवनं तदाहाराभावात्स्वेदजानां नाशः । विशेषेणेति वचनन्तु शेषाणां योनिजानां नाशद्योतनार्थम् । यथा बहूनां महामीनानामण्डजानां नातिवृष्टया नाशः तेषान्तु नाशोऽनावृष्टयैव ।

अवशिष्टानि महाभूतानि पञ्च ॥५॥

सर्वचराचरनाशे तेषां पञ्चत्वं प्राप्तौ पञ्च महाभूतान्येवावशिष्टानि ।

ततः संघातशक्तिचयः क्रमेण ॥६॥

ततः पञ्चमहाभूतानां क्रमेण संघातशक्तेः क्षयो जातः। ब्रह्मणा स्वशक्तिप्रतिबन्धात्। तथा चोक्तं वाक्यपदीये ब्रह्मकाण्डे कालशक्तिनिरूपणाधिकारे कारणशक्तेः प्रतिबन्धाऽभ्यनुज्ञे।

विघटनोन्मुखत्वाद्धि पृथिव्यास्त्रसरेणवः ॥७॥

संघातशक्तेः क्षयात् विघटनोन्मुखत्वात् क्रमशः प्रथमं पृथिव्याः विघटितास्त्रसरेणवो जाताः। तदग्राण्येव धाराणि तीक्ष्णतमानि भवन्ति शस्त्रादीनाम्।

ते जले लीनाः ॥८॥

ते पृथिव्यास्त्रसरेणवो जले लीना मिश्रिताः। तेन सर्वं जलं पङ्क इव मलिनं जातं, यथा सर्गकाले वर्णितम्।

तेजसा तस्यापि त्रसरेणवो वायुनाऽऽकाशचारिणः ॥९॥

तदा जलस्यापि तेजसा वाष्पीयभूय विघटितास्त्रसरेणवो जाताः। तदा पृथिवीजलयोः सर्वे त्रसरेणवः पुनः विघटितोन्मुखत्वात् सूक्ष्मातिसूक्ष्माः भूत्वा परमसूक्ष्मरूपस्पर्शशब्दवन्तः सन्तो वायुनोड्डीयमाना आकाशचारिणोऽवर्तन्त।

तेभ्यो द्व्यणुका अनेकत्वात् ॥१०॥

तेभ्यो जलपृथिव्योः त्रसरेणुभ्यो विघटिताः द्व्यणुकाः जाताः। यतो हि त्रसरेणौ बहवो द्व्यणुकाः भवन्ति। द्व्यणुकः, सजातीयौ द्वावणू यस्मिन्स द्व्यणुक इति ज्ञेयम्।

द्व्यणुकेभ्योऽणवः ॥११॥

द्व्यणुकेभ्यो विभक्ता अणवो जाताः। तत्राणुषु परिवेष्टकपूर्वभूतानां परमाणवः संहता भवन्ति। तस्मादिदानीं यावत्परमाणवो न भवन्ति।

पृथिव्या अणुषु रसाभावो जललयात् ॥१२॥

तत्र यः पृथिव्या अणुस्तस्मिन् रसाभावो भवति जललयात्तत्सम्पर्काभावात् तद्गुणाभावः।

रूपस्पर्शशब्दाः परकीयाः द्वयोरप्यापूर्वभूतलयात् ॥१३॥

तस्माद्यावत्कालपर्यन्तं पूर्वभूतानामग्न्यादीनां लयो न भवति तावत्कालपर्यन्तं तद्गुणाः परेषु भूतेषु वर्तन्त एव सम्पर्कात् । अत इदानीं पृथिव्यणुषु गन्धरूपस्पर्शशब्दाश्चत्वारः । जलाणुषु रसरूप स्पर्शशब्दाश्चत्वारो गुणाः ।

तेन मृदोऽणुर्गन्धरूपस्पर्शशब्दसम्पन्नः कठिनश्च आपूर्वभूतत्रयलयम् ॥१४॥

तेन पृथिव्या अणुरिदानीं पर्यन्तं यावत्पूर्वभूतत्रयलयो न भवति, तावत्कालं गन्धरूपस्पर्शशब्दसम्पन्नो भवति । काठिन्यमपि तत्र वर्तते । स्पर्शः कठिनो मृदुश्च । तुलाशस्त्रादिषु त्वणुशब्द उपलक्षणमात्र एव । अणुधारं त्र्यणुकधारं त्रसरेणुधारं वा ज्ञेयम् । तद्यथा—

अणुधारा तुला या स्यादणुं तोलयितुं क्षमा ।
अणुधारलवित्रेण विभज्यन्तेऽणवोऽपि च ॥१॥

यावत्स्थूला भवेद् धारा तावत्कार्यं न शोभते ।
यावद्यावद्भवेत्सूक्ष्मा तावत्तावत्प्रशस्यते ॥२॥

अणुधाराणि शस्त्राणि लोमोच्छेदीनि यान्यपि ।
शल्यकर्मणि युद्धे च प्रशस्यन्ते भिषङ्नृपैः ॥३॥

जलाणुरपि रसवान् मृदुश्च शीतोऽपि ॥१५॥

तथा जलाणुरास्वाद्यो रसवान् भवति । मृदुस्पर्शश्च तथा चं शैत्यमपि तदा वर्तते स्पृश्यत्वात् ।

तेजसो लयात्सर्वमदृश्यम् ॥१६॥

यदा तु वह्नेरपि लयो जातस्तदा मृज्जलयोरणवो वह्नेः सम्पर्काभावात्, तेभ्यो रूपस्यापि निष्क्रमणाददृश्याः भूताः रूपरहितत्वात् । वायुयोगस्त्वस्त्येव जलाग्निपृथिव्यणुभिरिदानीं पर्यन्तं तस्यालयात् ।

तदा मृदोऽणुर्गन्धस्पर्शशब्दसम्पन्नः जलस्यास्वाद्यो मृदुश्च ॥१७॥

इदानीं पृथिव्यणुर्गन्धस्पर्शशब्दसम्पन्नः कठिनश्च वर्तते, वायुसंयोगात् । स्पर्शस्य वर्तमानत्वात् । इन्द्रियग्राह्यत्वात् । यद्यपि न तावत्कश्चिदपि सेन्द्रियो जनोऽनुभविता, किन्तु तेषामणूनामनुभवयोग्यता तु वर्तत एव यथा सर्वचराचराणां नाशेऽपि पञ्चमहाभूतानां नानुभवनीयताहानिस्तथैवाणूनामपि । भेदस्त्वयमेव यत्पञ्चमहाभूतानि स्थूलानि तेषां स्थूलोऽनुभवः । अणूनां सूक्ष्मतरत्वात्सूक्ष्मानुभवः शक्यः । अत एवाणुपर्यन्तन्तु वैज्ञानिकैः द्रष्टुं शक्यते, तेजोलयात्पूर्वमेव न त्वनन्तरम् अदृश्यत्वात्सर्वस्य । तथैव जलस्याणुरास्वाद्यो मृदुः शीतश्च न तु दृश्यः ।

वायुलयात्सर्वस्पर्शाभावात्, न स्पृश्याः परमाणव इदानीञ्चतुर्णाम् ॥१८॥

यदा तु वायोरपि लयो जातस्तदा सर्वेषां स्पर्शाभावो भवति वायुसम्पर्काभावात् । तेन पृथिव्या अणूनां काठिन्यहानिः । जलस्य मार्दवशैत्यहानिः । अग्नेरप्युष्णताया अभावः । तेन चतुर्णामपि खादन्येषां परमाणवो वायुलयान्न स्पृश्याः अपीति खण्डिता कणादस्य "नाणुनित्यात्वात्" इत्यत्र परमाणुषु स्पर्शनित्यता, अस्पृश्यत्वात् । आकाशे तु स्पर्शः संघातासंघातोभयावस्थयोर्नास्ति । पृथिवीजलाग्निष्वपि वायुलयात्स्पर्शाभावो जातः । केवलो वायुरेव स्पृश्यः पुनरपि संघाताभावान्नाभिव्यक्तस्पर्शस्तत्रापि स इति ।

आकाशपरिवेष्टितत्वान्न संयोगो लग्नतात्मकः ॥१९॥

यत्तु नैयायिकानामयमभिप्रायो यत्, न चेत्परमाणवः स्पृश्याः स्युस्तर्हि संयोगाभावान्न संघातः, संघाताभावे न सृष्टिरिति । तेषामयमभिप्रायो यत्संयोगः परमाणुनां परमाणूनां परस्परं लग्नता । तन्न, न हि परमाणूनां संयोगो लग्नतात्मको भवति । येन परमाणूनां स्पृश्यतावश्यकी । आकाशे तु स्पर्शः अस्त्येव न । तथा च स्पर्शरहितेन आकाशेन मन्मते न्यायमते च "विष्टं ह्यपरं परेण" इति सूत्रानुसारं तु वायुवह्निजलपृथिव्यो वेष्टिताः । तत्र सूक्ष्मतमत्वात्, आकाश-

परमाणुभिर्वा न्यायमते व्यापकेन सूक्ष्मतमेन चाकाशेन वाय्वादीनां चतुर्णां संहताः परमाणवः परिवेष्टिताः, नान्यथा वेशनं सम्भवम्। तत्र प्रत्येकपरमाणोराकाशपरिवेष्टितत्वान्न वाय्वादीनां परमाणुद्वय-संयोगो लग्नता स्पर्शात्मकः। आकाशे स्पर्शाभावात्। आकाशे स्पर्शाभावादाकाशपरमाणुसंयोगस्तु लग्नता स्पर्शमूलको वक्तुमेव न शक्यते। तस्मात्संहनने सामीप्यमेवसंयोगो न तु लग्नता। तस्मान्न संयोगार्था परमाणुषु स्पृश्यता मन्तव्या, लग्नतास्पर्शात्मकसंयोगा-सिद्धेः।

वायोरभावात्स्पर्शवाहकत्वयोरभावः ॥२०॥

संघातरूपवायोरभावात्स्पर्शस्य वाहकत्वस्य चाभावो भूतः। यतो हि संघातावस्थापन्नो वायुरेव शैत्योष्णयोः गन्धस्य शब्दस्य च वाहको भवति। तेनेदानीं न तेषामन्येषां भूतानां गुणानामनुभवः कर्त्तुं शक्यः। वायुस्थ एव स्पर्शः सोऽप्यव्यक्तः।

तदावरोधाभावः ॥२१॥

वायुजलपृथिवीषु योऽवरोधात्मकस्पर्शः स न वायौ लीने सति पृथिवीजलयोः विघटितेषु परमाणुषु वर्तते, स्पर्शवतो वायोरसम्प-र्कात्। यथा पतितः कन्दुको जलं पृथिवीञ्चाश्रित्यावरुद्धो भवति नाग्रे गमनसमर्थः, तथैव वायुविच्छेदात्पूर्वं जलपृथिव्योः अणुषु सूक्ष्मा-वरोधो भवति, किन्तु वायुलयानन्तरं सर्वथा सर्वेभ्योऽवरोधस्य समाप्तिर्भवति वायोरपि परमाणुषु तदानवरोधो जायते। अवरोधस्य संघातगुणत्वात्, जलपृथिव्योराधारत्वाभावाच्चासंघातत्वाच्च।

एवमाकाशस्यापि लयेऽन्यत्र शब्दाभावः ॥२२॥

एवमाकाशस्यापि लये जाते, इतरभूताणुषु शब्दाभावः, आकाश-स्यासम्पर्कात्। यद्यपि वायोरेव लये जाते स्पर्शवाहकत्वाभावान्न शब्दश्रुतिः शक्या, पुनरपि आकाशपरमाणुसम्पर्काभावात् सर्वेभ्यः शब्दतन्मात्राऽपि पृथग्भूतेत्यव्यक्तोऽपि शब्दः पृथगिति ज्ञेयम्।

त एवाकाशपरमाणवः शब्दगुणकाः ॥२३॥

ये आकाशाणवः प्रलीनाः कालेन विघटितास्त एव आकाशपर-माणवः। ते च तदानीमपि शब्दगुणका एव। शब्दस्य तदसाधारण-गुणत्वात्, स्वभावस्य च हातुमशक्यत्वात्।

वायुः शब्दस्पर्शरूपरसगन्धशैत्यादिव्यञ्जकः स्पर्शात् ॥२४॥

वायुरेव संघातात्मकः स्वगतस्येतरभूतगतस्य वा सम्भविनः शब्दादिगुणस्य व्यञ्जकः । अणुपर्यन्तं हि संघातः ।

इन्द्रियाणां स्पर्शपूर्वके विषयसंयोगे एव प्रत्यक्षसम्भवात् ॥२५॥

यतो हि, इन्द्रियाणां विषयसंयोगे एव विषयप्रत्यक्षं भवति । विषयसंयोगस्तु स्पर्शपूर्वकः । स्पर्शस्तु वायोरेव गुण इति वायोर्लये जाते स्पर्शाभावे संयोगाभावे च कथं शब्दादिविषयाणां प्रत्यक्षम् ? न प्रत्यक्षमिति भावः ।

तदा तन्मात्रा एव पञ्चावशिष्टाः ॥२६॥

तदा सर्वमहाभूतलये जातेऽन्यमहाभूतसंयोगाभावेनान्यगुणानां पृथिव्यामभावात्पृथिव्याः परमाणौ न रसो न रूपं न स्पर्शो न च शब्दः । केवलः स्वगुणो गन्ध एवेति भावः, तस्माद् गन्धतन्मात्रा एव तदानीं पृथिवीपरमाणवः । गन्धमात्रस्यावशिष्टत्वात् । तथैव जलस्य रसतन्मात्रा, वह्नेः रूपतन्मात्रा, वायोः स्पर्शतन्मात्रा, आकाशस्य शब्दतन्मात्रा इति पञ्च तन्मात्राः । यद्यपि आकाशे सदैव शब्दतन्मात्रमेव तथापि सृष्टौ शब्दस्यान्यत्रापि विद्यमानत्वान्न सर्वत्र शब्दतन्मात्रा । अत एव परमाणवस्तन्मात्रात्मका एव ।

एतेभ्यः पञ्चज्ञानेन्द्रियाणि भौतिकानि ॥२७॥

एतेभ्यः पञ्चतन्मात्रेभ्यः पञ्चगुणग्रहणार्थं पञ्चज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानि जातानि । अतस्तानि भौतिकानि । ज्ञानार्थत्वाज्ज्ञानेन्द्रियाणि कथ्यन्ते । बुद्धियोगाज्ज्ञानसाधनत्वात् । इमानि भौतिकानि न तु महाभौतिकानि । एकैकगुणग्राहकत्वात् विशुद्धेभ्य एतेभ्य एकैकस्मादेव तेषां जायमानत्वं सिद्धमसंशयम् ।

एतदेव परत्वं पञ्चमहाभूतेभ्यः ॥२८॥

एषां ज्ञानेन्द्रियाणां पञ्चमहाभूतेभ्यो यत्परत्वमुक्तं, यथा च "इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः" तदेतदेव, पञ्चमहाभूतानि बहुमिश्रितानि स्थूलतराणि । एकैकसूक्ष्मविशुद्धभूतजन्यत्वात् सूक्ष्मतराणि ज्ञानेन्द्रियाणि । एतदेवैषामिन्द्रियाणां परत्वं यथा पञ्च-

महाभूतेभ्यः पञ्चतन्मात्राणि सूक्ष्माणि पराणि तथैव तत्तज्जन्येन्द्रियस्यापि परत्वं सूक्ष्मतरत्वञ्च ।

एभ्योऽपि परं मन उभयात्मकमभौतिकञ्च ॥२६॥

एभ्योऽपि ज्ञानेन्द्रियेभ्यः परं मन उच्यते सूक्ष्ममिति । इन्द्रियाणां प्रकरणे ज्ञानेन्द्रियाणि स्थूलानि मनस्तु सूक्ष्मेन्द्रियम् । एतदेवान्तःकरणमुच्यते । ज्ञानेन्द्रियाणि तु बहिःकरणानि कथ्यन्ते । तत्तु मनः ज्ञानकर्मोभयपरसाधनत्वादुभयात्मकं ज्ञानेन्द्रियं कर्मेन्द्रियञ्चोच्यते । नित्यत्वादभौतिकमपि जीवसहवर्ति । यतो मन एव बुद्धिः ।

एषां पञ्चोधिष्ठानानि पाञ्चभौतिकानि ॥३०॥

एषां पञ्चज्ञानेन्द्रियाणां पञ्चाधिष्ठानानि कर्णवाङ्नेत्ररसनानासाः । अधिकरणानीत्यर्थः । यान्यधितिष्ठन्ति आश्रयार्थं नान्यथा विषयग्रहः सम्भवः । तान्यधिष्ठानानि पाञ्चभौतिकानि, पञ्चभूतविनिर्मितत्वात्, शरीरावयवत्वात् । शरीरं हि पाञ्चभौतिकं भवति ।

पञ्च कर्मेन्द्रियाणि च भौतिकानि पराणि ॥३१॥

यथा ज्ञानेन्द्रियाणि भौतिकानि पराणि तथैव पञ्च कर्मेन्द्रियाण्यपि भौतिकानि पराणि च । एकैकभूतजन्यत्वात् । वाक्पाणिपादोपस्थपायवः पञ्चकर्मेन्द्रियाणि । कर्मसाधनत्वात् ।

तेभ्य एव वचनादानविहरणविसर्गकर्मकराणि वाक्पाणिपादोपस्थपायूंषीन्द्रियाणि ॥३२॥

तेभ्य एव पञ्चतन्मात्रेभ्यो वचनादानविहरणानन्दविसर्गाख्यकर्मकराणि वाक्पाणिपादोपस्थपायूंषि पञ्च कर्मेन्द्रियाणि जातानि । तत्राकाशाद्वाक् शब्दकर्मा । वायोः पाणी, आदानकर्माणौ । अग्नेः पादौ गगनकर्माणौ । जलादुपस्थः जलत्यागकर्मा, जलं हि मूत्रशुक्रे, ययोस्त्यागेनानन्दो जायते । पृथिव्याः पायुर्मलत्यागकर्मा । अत्राकाशवायुवह्निजलपृथिवीनामानि तन्मात्रग्राहकाणि ।

पञ्चाधिष्ठानानि च तेषां जिह्वोर्ध्वाधः-शाखालिङ्गगुदानि ॥३३॥

तेषां कर्मेन्द्रियाणां पञ्चाधिष्ठानानि, जिह्वा ऊर्ध्वशाखेऽधोशाखे लिङ्गं गुदमिति । विकृतेषु इन्द्रियेषु जातेषु वातदुष्टेषु कर्मकरशक्त्यभावे जिह्वाशाखालिङ्गगुदानि सर्वाणि गतिविहीनानि भवन्ति । पुनश्चौषधादिभिः शक्तिप्राप्तौ गतियुक्तानि जायन्ते । तेन ज्ञायते कर्मेन्द्रियतदधिष्ठानयोर्मध्ये भेदः । भिन्नानीन्द्रियाण्यधिष्ठानानि च भिन्नानि ।

एतानि सप्त पञ्चकानि ॥३४॥

पञ्चानां समाहारः पञ्चकम् । तानि पञ्चकानि सप्त संख्यकानि । पञ्च तन्मात्राणि, पञ्च महाभूतानि, पञ्च विषयाः, पञ्च ज्ञानेन्द्रियाणि, पञ्च तदधिष्ठानानि, पञ्च कर्मेन्द्रियाणि, पञ्च तदधिष्ठानानीति ।

अनवरोधात्परिधिसमाप्तिः ॥३५॥

तथा च सर्वतो वायुविच्छेदात्सर्वतोऽवरोधस्पर्शपरिसमाप्तिः । तत्समाप्तेः परिधिः समाप्तेति खण्डितं कणादस्य "नित्यं परिमण्डलम्" इति वचनम् । तस्माच्छङ्करस्य परिमाणोर्निरवयवत्वस्य, तथा च परमाणुद्वयसंयोगस्य नैयायिकाभिप्रेतसंयोगखण्डनपरं खण्डनं त्वयुक्तमेव । मन्मते समीपावस्थानस्यैव प्रागुक्तस्य संयोगपदार्थत्वात् । अतः पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतमिति साध्वेवोक्तिः । अथवा नित्यं परिमण्डलमित्यत्र परिमण्डलपदं सत्तामात्रद्योतकं न तु परिधिद्योतकम् । स्पर्शाभावात्, परिध्यभावात् । परमाणूनामस्पृश्यत्वात् । निरवयवत्वन्तु, न सन्त्यवयवाः खण्डाः यस्मिन्, न भवितुं शक्नुवन्ति खण्डा अवयवा यस्मिन् सोऽखण्डः, अनवयवः, अयौगिकः, अविनाशितत्त्वम्, यौगिकश्चेद्विनाशी स्यात्, योगस्यानित्यत्वात्, उत्पादविनाशशालित्वात् । तस्मात्परमाणुः सत्यो नित्यः सत्तावान् पर्यन्तहीनः परिधिरहितः । अन्यथा सावयवत्वप्रसक्त्याऽनवस्थादोषप्रसङ्गः । अथवा यः स्वयमेव सर्वतोऽन्तिमः खण्डोऽविनाशिखण्डः । अखण्डः खण्डः, अनवयवोऽवयवः । स तु निराकारोऽव्यक्त इति मे सिद्धान्तः । तत्राखण्डनीयखण्डेऽपि पर्यन्तताभा-

वस्तु कथमित्युच्यते ? यदा परमाणूनां संहननं भवति तदा अन्योन्यापेक्षया अयमस्मात्पूर्वः पश्चिमः उत्तरो दक्षिणः ऊर्ध्वोऽधः इति व्यवहारः शक्यः, तथा चेदं पूर्वतलं पश्चात्तलमादिकं परमाणुषु पर्यन्तताव्यवहारः । यथा दिशा त्वकैव न सावयवा किन्तु कमपि ग्रहं लोकं स्तम्भादिकं वाधारं मत्वा व्यवह्रियते, इयं प्राची, इयं प्रतीची, इयमुत्तरा, इयं दक्षिणेति कल्प्यते केवलं व्यवहारार्थं सरलतयावगत्यर्थम् । ग्रहादिकाणामाधाराभावे तु दिशा पुनरेकैव, न तत्र काचित् प्राची, न प्रतीची, नोदीची, न च दक्षिणेति । तथैव परमाणुषु संहननावस्थायामेव पर्यन्तताव्यवहारः शक्यः । स तु कल्पनामात्र एव । प्रलयेऽसंहतः सन्नेकोऽन्तिमः खण्डः । अन्योन्यापेक्षाभावात्, पर्यन्तताव्यवहाराभावोऽशक्यत्वात् । तस्मात्पर्यन्तहीनः, परिधिरहितः, अनवयवः, अखण्डः, अपरिमण्डलः, अस्पृश्यः । तस्मान्न शङ्करोक्तसावयवत्वदोषप्रसङ्गः ।

तस्मान्निराकाराः परमाणवो ध्रुवं ध्रुवम् ॥३६॥

तस्मात्परमाणवो निराकाराः परिमण्डलत्वाद्याकारशून्याः सन्तीति ध्रुवम् । तन्मात्रात्मका अव्यक्ता इति ज्ञेयम् ।

इति तृतीयः पादः

इति श्री जगदीशाचार्यविरचिते परमाणुदर्शने

तृतीयः पादः समाप्तः ।

अथ चतुर्थे पादे प्रथमोऽध्यायः

स्पर्शहेतुको हि संयोगो विषयेन्द्रिययोः, विषयेन्द्रिययोः ॥१॥

अथ गायत्री-महाभाष्यम्—इन्द्रियैर्विषयानुभूतिर्ग्रहणं वा क्रियते। तत्तूभयोर्विषयेन्द्रिययोः संयोगादेव भवति। स संयोगः स्पर्शहेतुक एव। कथमित्युच्यते। पञ्च विषयाः शब्दस्पर्शरूपरसगन्धास्तद्ग्राहकाणि पञ्च ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि। तेषां पञ्चाधिष्ठानानि चेन्द्रियाणां कर्णत्वङ्नेत्ररसनानासाः। तत्र न किमपीन्द्रियं स्वाधिष्ठानं परित्यज्यापरित्यज्य वा विषयस्थानं गच्छति। तथा च चक्षुरिन्द्रियं घटस्थानं गत्वा घटेन संयुज्य घटप्रत्यक्षं करोतीति प्राचां नव्यानाञ्च नैयायिकानां मतमयुक्तम्। अक्षि प्रतीति प्रत्यक्षमिति सुस्पष्टनिरुक्तेः। अक्षिप्रतिविषयाः, न तु विषयान् प्रत्यक्षि इति ज्ञापकात्। यतो हि विषयाः स्वयमेवाधिष्ठानानि प्राप्य तत्रेन्द्रियैः संयुज्य गृहीताः भवन्ति चक्षुरिन्द्रियञ्चेद्विषयस्थानं गच्छेन्न रजतस्य शुक्तौ भ्रमः स्यात्। चक्षुषः शुक्तिप्रतिबिम्बग्रहणे तु रजतस्य क्वचित् पूर्वदृष्टस्य भ्रमो जायते। तथैव चाकचिक्यवत्वात्। इन्द्रियञ्चेत्तत्र गच्छेत्, न केवलं चाकचिक्यमेवानुभवेत् किन्तु शुक्तिमपि पश्येत् ततो न रजतविभ्रमः स्यात्। तस्मान्नेन्द्रियाणि बहिर्गच्छन्ति विषया एवेन्द्रियाणि गच्छन्ति। तेन गौतमोक्तं चक्षुषः प्राप्य ग्राहकत्वं पूर्णतया खण्डितम्। यतो हि प्राप्तग्राहकत्वमेवेन्द्रियेष्वस्ति। अर्थात् स्वाधिष्ठानं प्राप्तमेव विषयं गृह्णन्ति न तु स्वयं विषयस्थानं प्राप्य गृह्णन्ति तत्क्रमशो वर्ण्यतेऽग्रे।

१. शब्दाः वीचितरङ्गन्यायेन बाह्यकर्णविवरं प्राप्य कर्णपटहमाघातयन्ति नादयन्ति च। ते च नादा अस्थित्रयात्मकमध्यकर्णद्वारा तेनैवास्थित्रयेणाग्रे प्रेरिताः अन्तःकरणं तृतीयं शंखाकारं प्राप्य तत्र स्थितं जलं सनादं तरङ्गयन्ति। ते नादास्तरङ्गारूढास्तत्र वर्तिनो वाततन्तून् सूक्ष्मान् स्पृशन्ति। तत्रैव स्थितं कर्णेन्द्रियं शब्दान्

गृह्णाति। तदेव मस्तिष्कस्थां बुद्धिं ज्ञापयति, सा चात्मानं ज्ञापयति। स संयोगस्पर्शहेतुक एव। यत्तु शब्दप्रत्यक्षे समवायः सन्निकर्षो नैयायिकानां, तन्न, कर्णविवराकाशस्य इन्द्रियत्वाभावात्। अन्यथा अङ्गुल्यापूरिते विवरे कर्णाकाशे पिहिते सति नान्तर्नादः श्रूयेत, कर्णाकाशमेव चेदिन्द्रियं स्यान्न कदापि कोऽपि बधिरः स्यात्। बधिराणामपि कर्णाकाशस्याबधिराणामिव वर्तमानत्वात्। तस्मान्न-समवायसन्निकर्षोक्तिर्युक्ता न च कर्णाकाशमिन्द्रियम्। तत्तु महाभूतमेव। तस्माच्छब्दज्ञाने संयोगसन्निकर्ष एव हेतुः। संयोगस्य हेतुकत्वात्स्पर्शोऽपि संयोगद्वारा ज्ञाने साधनम्। तथा च शब्दे समवेतत्वात् शब्दत्वस्य संयुक्तसमवायेनैव ग्रहणम्।

२. तथैव च शैत्यौष्ण्याशीतकाठिन्यमार्दवादिस्पर्शग्रहणेऽपि न त्वगिन्द्रियं स्पर्शदेशं गच्छति क्वचित्। अपितु तु स्पर्शरूपाः विषयाः स्वयमेव सर्वशरीरवर्तिचर्मणि, वाततन्त्वङ्कुरजालात्मकेन तत्स्थत्वगिन्द्रियेण संयुज्य गृहीता भवन्ति। तस्य सम्बन्धस्य स्पर्शहेतुकत्वं तूच्यते सर्वैः।

३. तथा च रूपविषयेऽपि। न चक्षुरिन्द्रियं बहिर्धावति, दृश्यार्थानां घटादीनां रूपाणि आकृतयश्चातिसूक्ष्माण्यदृश्यानि सततं निष्क्रमद्भिरदृश्यैः स्वानुद्भूतकिरणैः संयुक्तानि तदारूढानि नेत्रगोलककृष्णमण्डलमध्यवर्तिमसूरपरिमाणच्छिद्रद्वारा नेत्राभ्यन्तरं प्रविश्य नेत्रगोलकाभ्यन्तरमध्यस्थेन मांससूत्रावलम्बितेनोन्नतोदरेण काचेनकफविनिर्मितेन पारदर्शकेणोन्नतोदरत्वात्पर्याकुञ्च्य सूक्ष्मीभूताः, किरणानामृजुगामित्वाद्विलोमतां प्राप्ताः सन्तो नेत्रगोलकाभ्यन्तरपश्चात्तले वाततन्तुविनिर्मिते तन्मध्यवर्तिनि रूपकूटे वाततन्त्वङ्कुरनिर्मिते प्रकाशन्ते। तत्रैव रूपकूटस्थं चक्षुरिन्द्रियम्। तत्रापि संयोग एव सन्निकर्षः स्पर्शहेतुकः। कूटं स्पृशन्ति विषयकिरणा यस्मात्। तदा बोधो जायते, ईदृश्य आकृतयो रूपाणि च नानावर्णा इति दर्पणवद्यथावत् प्रकाशन्ते। न बिम्बाल्लेशमात्रोऽपि भेदो जायते। यत्तु गौतमेनोक्तं—

"रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम्"

अर्थात् नयनरश्मिमत्। तेन नयनज्योतिषैव सन्निकृष्टानि बाह्यवस्तूनि गृह्यन्ते तन्न, नयनरश्मीनां बहिर्गतानां कदाप्यनुपलम्भात्।

"नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ।"

तत्तु विषया इन्द्रियं प्राप्ता गृह्यन्ते इति पक्षे लोष्ठरश्मिपक्षेऽपि योजयितुं शक्यते । एतदेवोचितम् । यल्लोष्ठादिषु अनभिव्यक्तरूपा अनुद्भूता रश्मयः सन्ति, पञ्चमहाभूतसंपृक्तत्वात् । किन्तु प्रत्यक्षतोऽनुपलब्धिः । सानुपलब्धिर्नाभावहेतुर्वक्तुं शक्यते इति । यत्तूक्तं—

"नक्तञ्चरनयनरश्मिदर्शनाच्च"

सिद्धं नयनं रश्मिमत्, तदपि न । यतो हि नाहं नयनस्य रश्मिमत्त्वं प्रतिषेधामि, नक्तञ्चरनयनरश्मीनां बहिर्गतानामनुपलम्भेऽपि तैजसत्वेनास्मदादिचक्षुःष्वपि रश्मिसम्भवात् । नान्यथा नयनं दृश्येत् अपितु नयनरश्मिषु ग्रहणशक्तिप्रतिषेधं साधयामि । यन्नयनरश्मयः स्वाश्रयप्रकाशका एव अर्थात् नयनप्रकाशका एव न त्वर्थग्राहका इति । यत्तु मार्जारादिनक्तञ्चराणां नयनं रात्रौ चमत्कृतिमत् । एषा प्रकृतिस्तु मसूरपरिमाणच्छिद्रभेदार्थमेव नान्यथा दृश्यार्थानां मूषकादीनां मृगयाणामाकृतयो रूपाणि च तमसि नेत्रगोलके प्रविश्य मूषकादीनि प्रकाशयन्तु । किन्तु सा चमत्कृतिरन्यैः प्राणिभिर् अस्माभिश्च दृश्यैव न तु ग्राहिका । आस्माकीने तु तथा चमत्कृत्यभावान्न वयं तमसि दृष्टुं समर्थाः । अर्थात् सा चमत्कृतिः दृश्यैव न दर्शिका, ग्राह्यैव न तु ग्राहिका, यच्चक्षुरिन्द्रियं तत्तु तदधिष्ठानात्किञ्चिदन्यत् । आभ्यन्तरमेव तत् । तत्त्रिविधम्—प्रकाशदृक् तमोदृक् उभयदृक् च । तत्र सूर्याग्निप्रदीपप्रकाशे सति दर्शकं प्रकाशदृक्, तमसि सति दर्शकं तमोदृक्, प्रकाशे तमसि च उभयस्मिन् दर्शकमुभयदृक् । ततः प्रकाशदृक् मानवानां, तमोदृक् उलूकादीनाम् उभयदृक् तु मार्जारादीनाम् । यथा चोक्तं दुर्गासप्तशत्याम्—

"दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥"

यत्तु गृध्रादीनामतिदूरदृष्टिमत्त्वं तत्तु दूरवीक्षणयन्त्रवत् नेत्रकाचस्यात्युन्नतोदरत्वादिरचनावैशिष्ट्या । यत्तु, अनुद्भूता रश्मयो दर्शिन्य इति तेषामाशयस्तन्न, दृश्यार्थेष्वपि तथैवानुद्भूतरश्मयः कथन्न मन्यन्ते । यैर्दृश्यार्थाः स्वानुद्भूतरश्मिभिः स्वयमेव चक्षूंषि

प्रतिविम्बन्ति गृह्यन्ते च। वस्तुतस्तु नात्र न्यायमतं युक्तम्। सर्व-पाञ्चभौतिकपदार्थेषु अग्निसंयोगाद्यथा रूपं विद्यते, तथा तेषु तत्संयो-गात्स्वप्रकाशकरश्मयोऽपि सन्ति। तैरेव सर्वं जगत्प्रकाशते। तथैव सर्वेषां नयनेषु च तदाभ्यन्तरबाह्याङ्गावयवेषु रश्मयः सन्ति। ते रश्मयः सततमनुद्भूता बहिर्निःसरन्ति, किन्तु न ते बाह्यवस्तुग्रहण-क्षमाः, अपि तु स्वाश्रयप्रकाशनक्षमा एव केवला लोष्ठवत्। तदैव परस्परं नेत्रगोलकप्रत्यक्षं भवति। नयनरश्मीनां स्वाश्रयप्रकाशकत्वन्तु अन्यशरीराङ्गगतानां रश्मीनां स्वाश्रयप्रकाशकत्वेन समं, न तु नयनरश्मिषु ग्रहणशक्तिः। वस्तुतस्तु रश्मयो द्विधाः। उद्भूता अनु-द्भूताश्च। ते द्विविधा अपि रूपवत्त्वात् विषयाः, विषयत्वात् ग्राह्या एव, न तु ग्राहकाः। अत एव विषयग्रहणे आलोकान्तरापेक्षा। तस्मान्नात्र गौतमोक्तिः साध्वी। उद्भूतानुद्भूतयोर्मध्येऽयं भेदो यदुद्भूता रश्मयश्चमत्कृतिमन्तो यथा सूर्यचन्द्रताराप्रदीपादीनाम्। अनुद्भूतरश्मयस्तु चमत्कृतिविहीना यथा लोष्ठादीनाम्। तत्र स्वाश्रय-प्रकाशत्वन्तूभयोरपि समम्। किन्तु चमत्कृतिमत्वादुद्भूतरश्मिषु स्व-प्रकाशकत्वं स्वाश्रयप्रकाशकत्वमन्यार्थप्रकाशकत्वमपीति त्रयमपि। तेन लोष्ठपाषाणादिषु येऽनुद्भूतरश्मयः सन्ति तेषु स्वाश्रयप्रकाशक-त्वमेव। एवं सूर्यादीनां रश्मिषु स्व-स्वाश्रय-अन्यार्थप्रकाशकत्वमस्ति। इति विस्तरः। अर्थात् सूर्यकिरणाः स्वान्, सूर्यं, घटपटादीनि च प्रकाशयन्ति, न तथा लोष्ठपाषाणादीनाम्। पुनरपि न कदापि उभय-प्रकारकेष्वपि रश्मिषु ग्रहणशक्तिः। न च ते रश्मयः दृष्टिरिति वक्तुं शक्यन्ते। दृश्यत्वात्, ग्राह्यत्वात्। यतो हि ग्राहकाणि इन्द्रि-याणि तु सर्वाण्यपि अतीन्द्रियाणि न तु दृश्यानि। न चेल्लोष्ठादिषु सर्वेषां शरीरेषु च रश्मयः स्युः कथं तर्हि दर्पणे सुचिक्कणस्थले च प्रतिबिम्बं दृश्येत। यतो हि किरणा एव प्रतिबिम्बोत्पादकाः, नान्यत् किंचिदिति सर्वसम्मतम्। तथैवोत्तरोत्तरप्रतिबिम्बस्यापि प्रतिबिम्बेषु अनुद्भूता उद्भूता वा रश्मयो भवन्ति तेऽपि स्वाश्रयप्रकाशकाः। नान्यथा प्रतिबिम्बस्य प्रतिबिम्बं दर्पणान्तरे दृश्येत। वस्तुतस्तु मूल-दृश्यार्थस्य उद्भूता अनुद्भूता वा रश्मयः प्रथमदर्पणस्य सुचिक्कणतलं स्पृष्ट्वा तत्र च प्रतिबिम्बं कुर्वन्तो भासयन्तश्च, दर्पणस्य सुचिक्कण-त्वात्, त एवाविच्छिन्नाः रश्मयः परावृत्य द्वितीयदर्पणेऽपि प्रतिबिम्बं कृत्वा, पुनः परावृत्य तृतीये चतुर्थे पञ्चमे वा अनन्तेष्वपि प्रतिबिम्बा-

नुत्पादयितुं समर्थाः । तथा च लेशमात्रोऽपि भेदो न भवति वर्णाकृतिषु । वर्णिता चैषा प्रतिबिम्बपरम्परा महाकवि कालिदासेन कविकुलकमलदिवाकरेण श्रीमद्रघुवंशकाव्ये महति इन्दुमती-स्वयंवरवर्णने । यथा—

तासु श्रियाराजपरम्परासु, प्रभाविशेषोदयदुर्निरीक्ष्यः ।
सहस्रधाऽऽत्मा व्यरुचद्विभक्तः, पयोमुचां पङ्क्तिषु विद्युतेव ॥

व्याख्यातञ्चोपपत्तिपुरस्सरं श्रीमल्लिनाथेन सम्यगिति तत एवावधार्यमिति नेह प्रतन्यते । तथैव नेत्राभ्यन्तरपश्चात्तले वाताङ्कुरनिर्मिते सुचिक्कणे रूपकूटाख्यदर्पणेऽपि सर्वबाह्यवस्तूनां रश्मयो स्वाश्रयस्य रूपवर्णाकृतीनां प्रतिबिम्बानि यथावदुत्पादयन्ति लेशमात्रमपि बिम्बाद् भेदो न भवति । ततस्तद्ग्रहो जायते । अतो नेत्ररश्मयो दृश्याः । तथा च त एव चक्षुरिन्द्रियं यद्विषयस्थानं प्राप्य तदाकारवृत्तिं कृत्वा ग्रहणं करोतीति नैयायिकानामुभयं प्रत्याख्यातं वेदितव्यम् । यतो हि न च चक्षुरिन्द्रियं रश्मिरूपं दृश्यञ्च भवति अतीन्द्रियत्वादिन्द्रियस्य । नापि येऽनुद्भूता रश्मयस्तेषु प्रागुक्तरीत्याग्रहणशक्तिरेवास्ति । यदि च यथाभिमतं गौतमस्य मार्जारादीनां नक्तञ्चराणां रात्रौ चमत्कृतनयनं ग्राहकमिन्द्रियञ्चेत्तदा दृश्यत्वान्न तदतीन्द्रियम् । यदा तु इन्द्रियाणामतीन्द्रियत्वं सर्वैः स्वीक्रियते तदा कथं तच्चमत्कृतिमच्चक्षुरिन्द्रियं भवितुं शक्यम् । तस्मादर्थानां रश्मय इन्द्रियाधिष्ठानं प्राप्य स्वाश्रयरूपवर्णाकृतीः प्रकाशयन्ति । तदैव हि स्वदेहरूपप्रकाशकानुद्भूतकिरणेषु संयमाद् योगशक्त्या तान् किरणानभिभाव्यावरोध्य च, एनानेव स्वानुद्भूतकिरणैः स्वशरीरप्रकाशकत्वशक्तिमर्थादन्यपुरुषग्राह्यशक्तिमवरोध्य यदा योगिनोऽदृश्या भवन्ति तदेव तेषामन्तर्धानमुच्यते । न तदा योगी केनचिदपि पुरुषान्तरेण दृश्यते, यतो हि दर्शने चक्षुषः ग्रहणशक्तिस्तथा शरीरादीनां दृश्यार्थानां ग्राह्यत्वशक्तिश्चोभयं साधकम् । यथा प्रकाशिताः सन्तोऽपि दृश्यार्थाः चक्षुषोः ग्रहणशक्तिनाशे वा, तस्याधिष्ठानविक्रियया न दृश्यन्ते । तथैव सत्यामपि चक्षुषो ग्रहणशक्तौ शुद्धायामधिष्ठानस्य चाविक्रियायां योगिभिरवरुद्धग्राह्यशक्तिकानि योगिशरीराणि लेशतोऽपि नान्यैर्दृश्यन्ते । यथा ग्रहणशक्तिनाशे चक्षुरिन्द्रियं द्रष्टुमशक्तम् । तथैव ग्राह्यशक्तिनाशे योगिशरीराणि द्रष्टुमशक्यानि । तदेवान्तर्धानमिति, नात्राश्चर्यावसरो विवेकिनाम् । अविवेकिनान्तु सर्वत्राश्चर्यमेव ।

तथैव शब्दस्पर्शरसगन्धेष्वपि । तत्तद्ग्राह्यशक्तिप्रतिबन्धात् न योगि-शब्दः केनचित् श्रोतुं शक्यः, शब्दतरङ्गावरोधात् । तथैव रसादि-विषयेऽपि ज्ञेयम् । तदा योगी तु सर्वं चक्षुरादिभिः पञ्चधैव साक्षात् करोति न च योगिनं कश्चिदेकधाऽपि साक्षात्कुरुते । इदं त्ववधेयमत्र, रूपस्य स्पर्शस्य वा ग्रहं विना न कदापि तयोराश्रयद्रव्यस्य प्रत्यक्षं भवति इत्युद्भूतरूपस्य स्वाश्रयचाक्षुषप्रत्यक्षं प्रति, उद्भूतस्पर्शस्य च स्वाश्रयद्रव्यस्य प्रत्यक्षं प्रतिहेतुत्वं स्वीक्रियते नैयायिकैः । अत्रोद्भूत-रूपात् दृश्यानां द्रव्याणां व्यक्तरूपस्य ग्रहणं, न तु व्यक्तरूपस्य लोष्ठ-पाषाणादेरनुद्भूतकिरणानां ग्रहणमिति ज्ञेयम् । स्वकायग्रहणे हेतुभूत-योरुद्भूतरूपोद्भूतस्पर्शयोर्योगिना स्वयोगशक्त्या प्रबलयाऽभिभवेनानु-द्भूतत्वापादनादेव तदा योगिनः कायोऽन्तर्धानमापद्यमानो न दृश्यत इति पुनश्चात्रावगन्तव्यम् । यदा योगः सिद्धो भवति तदा सर्वशक्ति-मत्ता समायाति योगिनि । तदुक्तमभियुक्तैः "नास्ति योगसमं बल-मिति ।" तदा योगी यथा स्वबुद्धिं मनो वा बहिर्मुखं गच्छन्तं निय-म्यान्तर्मुखं करोति, न तदा तस्य मनसो बाह्यव्यापारः । तथैव स स्वशरीरस्य सततं निष्क्रमन्तं किरणसमूहं बहिर्मुखं गच्छन्तं योग-शक्त्या नियम्याभ्यन्तरं करोति, न स किरणसमूहो बहिर्गन्तुं समर्थो भवति । तस्मान्न तस्य शरीरं दृश्यते । उपदेशादिकन्तु श्रोतुं शक्यते, न यावच्छब्दान्तर्धानं करोति । पुनश्चात्र बोध्यम्, वस्तुतस्तु सजाती-याणूनां परस्परं निरन्तरसंघर्ष एवोद्भूतशब्दस्पर्शरूपरसगन्धोत्पा-दकः । योगी यदा स्वशरीरसमवेततेजोऽणूनां परस्परं संघर्षं प्रबलयोग-शक्त्यावरुद्धं करोति तदा प्रकाशकिरणाः नोत्पद्यन्ते । किरणानामनु-त्पत्तौ तथा तेषां पुरुषान्तरचक्षुरिन्द्रियाधिष्ठानेऽप्राप्तत्वात् योगि-शरीरं न दृश्यं भवति इति रहस्यमन्तर्धानस्य । तथैव शब्दस्पर्शादि-विषयेऽपि ज्ञेयम् । तथा च सहैव पञ्चभूताणुसंघर्षनियमनाच्छब्दादीनां पञ्चानामपि सहैव ग्राह्यशक्तिस्तम्भे, एकधाऽपि योगी न गृह्यते । स तु परेषां पञ्चधैव ग्रहणं करोति । तथा चोक्तं पातञ्जलयोगशास्त्रे "कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासम्प्रयोगेऽन्तर्धान-मिति," अत्र "चक्षुःप्रकाशासम्प्रयोगे" इत्यस्य ग्राह्यकायकिरणानां चक्षुरसम्प्रयोगे इत्यर्थः । इन्द्रियाणां प्राप्तग्राहकत्वात् । "एतेन-शब्दाद्यन्तर्धानमुक्तं वेदितव्यमिति" चापि तत्रैव ध्वनितम् । पुनश्चाति-स्थूलप्रमाणं प्रत्यक्षं दृश्यते यत् प्रस्तरलौहादिपदार्थानां परस्पराघा-तेन संघर्षेण वोष्मा जायते । अत्यन्ततीव्रघर्षणाघाताभ्यान्तु ज्योतिः-

स्फुलिङ्गानि च उत्पद्यन्ते। तथैव सर्वेषु विश्वपदार्थेषु सूक्ष्मातिसूक्ष्मो महान् संघर्षो विद्यते, तत्परिणाम एव शब्दस्पर्शरूपादिकम्। संघर्ष-परिणाम एवाभ्रेषु तडित्, तथा चाधुनिकवैज्ञानिकैराविष्कृतकृत्रिम-विद्युदपि दृश्यते क्षणे प्रकाश्यते क्षणे विलीयते। तत्र संघर्षे कृत संयमो वा कृतनियन्त्रणो योगी ग्राह्यशक्तिमवरोध्यादृश्यो भवति। तथा प्राणिनां शरीरे हृदयस्पंदनं हृदयाद्रक्तप्रवाहं झरझरायमाणो नदन्निर्झर इव क्षेत्रे प्रणालीषु जलप्रवाहमिव शरीरे धमनीसिराषु च रक्तगतिं किञ्च वृक्कयोर्मूत्रस्रावणक्रियां तथा चान्त्रेषु आहारगति-माहाराद्रसाचूषणादिक्रियाञ्च न कश्चिदपि जनः पश्यति, किन्तु विशेषदर्शिनो वैद्याः सर्वं पश्यन्ति जानन्ति च तथा च यथावश्यक-मवरुद्धान् प्रवर्तयितुमतिप्रवृत्तांश्चावरोद्धुं शक्ता भवन्ति औषधैः। तथैव यद्यपि न साधारणो जनः पश्यति वैश्वपदार्थाभ्यन्तराणूनां संघर्षं सततं चलन्तं तथापि विशेषदर्शिनो वैज्ञानिका योगिनश्च जान-न्त्येव, तत्र योगशक्त्या प्रवृद्धात्मशक्त्या योगिनस्तमवरोद्धुं शक्ताः भवन्ति, येन रूपादिकमदृश्यं भवति, नात्र संशयावसरः। इयता स्थूलो-दाहरणेन विस्तरेणापि चेत् कश्चिन्नावबुद्धचते, अन्ध एव, शास्त्रस्य दोषोऽत्र कः। एता अपि योगिनां भूतजयात्मिका विभूतयो लोकानां श्रद्धाविवर्द्धनाय योगक्रियाशक्तिप्रमाणाय योगक्रियायाञ्चाभिरुचये। एता अपि योगी त्यजति, निर्बीजसमाधौ बहिरङ्गत्वात्। एतासु विभू-तिषु निमग्नो योगी आत्मानं धन्यंमन्यमानः, सिद्धंमन्यमानश्च पुन-र्भ्रश्यति, न मोक्षं प्राप्नोतीत्यलं विस्तरेणात्र। तथा च त्वगिन्द्रिय-रसनानासिकावृत्तिरसनघ्राणेन्द्रियेऽपि ज्ञेये। तत्रापि रसगन्धज्ञाने संयो-गसन्निकर्ष एव स्पर्शहेतुको हेतुः। तत्र बोधसाधनानि बुद्धीन्द्रियाणि, तत्र पृथिव्यंशगन्धतन्मात्रयोगात् घ्राणो, जलतन्मात्रयोगाद्रसनं तथैवे-तराणि च ज्ञेयानि। तस्मादेव स्व-स्वभूतगुणग्राहकत्वं तेषामिति विस्तरः। तथा च कर्मसाधनानि कर्मेन्द्रियाणि। वस्तुतस्तु घटस्य पाञ्चभौतिकत्वात्पञ्चधा प्रत्यक्षं भवति। घटगतगन्धस्य घ्राणेन, तद्वद् रसस्य रसनेन, तद्रूपस्य चक्षुषा, तत्स्पर्शस्य परिमाणाकृतिरूप-स्य त्वगिन्द्रियेण तथा घटशब्दस्य श्रोत्रेणैव प्रत्यक्षं भवति। तत्र घटगतरसगन्धशब्दाः प्रायो नापेक्ष्यन्ते लोकव्यवहारेऽनावश्यकत्वात्। यत्तु वादने घटशब्दोऽपेक्ष्यते, सुस्वादुभोजनार्थं सूपौदनार्थं घटस्य रस-गन्धयोरपेक्षा दृश्यते, तत्तु क्वाचित्कमेव मनोरञ्जनार्थम्, न तदभावे लोकव्यवहारहानिः। किन्तु रूपस्पर्शाविवापेक्ष्येते। तत्र स्पर्शाज्ज-

लाद्याहरणरूपप्रयोजनसम्भवः। रूपस्पर्शग्रहादेव चाकृतिग्रहः। तत्र घटस्तु नेत्रे गच्छत्येव न संयुज्यत एव न। चक्षुरिन्द्रियमपि स्वधिष्ठानाद्बहिर्न धावति। कथं तर्हि रूपप्रत्यक्षम्? अत एवोक्तं पूर्वं घटरूपस्यानुद्भूतरश्मयः रूपकूटे घटचित्रमुत्पादयन्ति, ततो ग्रहः इत्थं घट इति, तस्मादेव रूपदृष्टया चलचित्रवत् घटो गृह्यते इति घटचित्रयोर्न भेदः। किन्तु स्पर्शकार्यदृष्टया भेदः। तस्माद्विषयाणामिन्द्रियैः संयोगसन्निकर्ष एव हेतुः प्रत्यक्षस्य। स संयोगः स्पर्शहेतुक एव। इदं तु दृश्यते, पृथिवीन्द्रियं घ्राणः पृथिव्या एव निजगुणगन्धं गृह्णाति, न तु पृथिवीगतान्यशब्दस्पर्शरूपरसान्। तथा च रसनं रसमेव गृह्णाति न नु जलगतान्यशब्दस्पर्शरूपान्, तथैव चक्षुरपि वह्नेः गुणरूपमेव केवलं, त्वगिन्द्रियं शीतोष्णानुष्णाशीतकठिनमृदुस्पर्शानेव केवलं, श्रोत्रं शब्दमेव केवलं गृह्णाति। तस्मात् घटप्रत्यक्षे चक्षुषः घटेन योऽयं संयोगसन्निकर्ष उक्तोऽस्ति नैयायिकादिभिस्तन्न साधु। घटात्मकं यद्द्रव्यं तन्न चक्षुषा गृह्यतेऽयोग्यत्वात्। घटगतरूपस्यैव चक्षुःसंयोगजन्यप्रत्यक्षसम्भवात्। समस्तसांसारिकपदार्थानां घटादीनां रूपाण्येव चक्षुषा स्वाधिष्ठानं प्राप्तान्येवानुभूयानुमीयन्ते पूर्वम्। यदेतदाधारभूतं किञ्चिद् द्रव्यं तत्पश्चात्तु तत्सत्ताप्रत्यक्षं स्पर्शादेव। सर्वेषां विषयाणां शब्दस्पर्शरूपरसगन्धानां प्रत्यक्षे स्वस्वग्राहकेन्द्रियैः सह संयोगसन्निकर्ष एव हेतुः। शब्दत्वादिजातिप्रत्यक्षे तु संयुक्तसमवाय एव, अभावस्य विशेषणविशेष्यभाव एवेति त्रय एव सन्निकर्षाः। अन्यदप्युच्यते—इन्द्रियाणि स्वस्वविषयाकारं विषयं नीत्वा स्वस्वप्रणालीभिः कपालचतुष्टयावृतमस्तिष्काभिगामिनीभिः मस्तिष्के बुद्धौ शरीरस्य केन्द्रीयकार्यालये प्रतिभासयन्ति ज्ञापयन्ति च। तस्मादेव कारणात् बौद्धः शब्दः, बौद्धोऽर्थः, बौद्धः शब्दार्थप्रत्यय इति सिद्धान्तः। तदैव अयं घटोऽयं पट इदं रूपमयं शब्दः इत्यादिकं सर्वं बुद्धिस्थं प्रत्येवायमयमिति प्रयोगो युज्यते। तस्मात्सिद्ध एव संयोगः विषयेन्द्रिययोः। सः स्पर्शहेतुक एव। न नु इन्द्रियाणामतीन्द्रियत्वे कथं स्पर्शः सम्भवस्तेत्रोच्यते—यथा चात्मा अतीन्द्रियः सन्नपि सर्वं स्पृशति शृणोति पश्यति आस्वादयति जिघ्रति शरीरेण योगमपि लभते तथैवेन्द्रियाण्यपि।

इति प्रथमोऽध्यायः।

गायत्रीमहाभाष्यञ्च समाप्तम्।

अथ चतुर्थे पादे द्वितीयोऽध्यायः

वायोर्लयान्न स्पर्शः क्वचित् ॥१॥

तत्र स्पर्शस्तु वायोरेव गुणः। किन्तु वायोस्तु लयात्स्पर्शो न भवति क्वचिदपि तन्मात्रेषु।

स्पर्शाभावान्न संयोगः ॥२॥

सर्वतः स्पर्शाभावान्न तेषां तन्मात्रात्मकानां परमाणूनामिन्द्रियैः संयोगो भवितुमर्हति।

संयोगाभावादग्राह्याः ॥३॥

इन्द्रियैः संयोगाभावाच्छब्दस्पर्शरूपरसगन्धतन्मात्रात्मकाः परमाणवोऽग्राह्याः जयन्ते।

अग्राह्यादव्यक्ताः ॥४॥

यदाऽग्राह्याः जातास्तदा अविषया इति। अविषयत्वादव्यक्तास्ते परमाणवस्तन्मात्रात्मकाः।

अव्यक्तत्वादज्ञेयावर्ण्यानिर्वचनीयाः ॥५॥

अत एवाव्यक्तत्वात्ते परमाणवोऽज्ञेयाः अवर्ण्याः अनिर्वचनीयाः जायन्ते।

आधारयोर्जलपृथिव्योरभावान्नाग्नितन्मात्ररूपाभिव्यक्तिः ॥६॥

यथा चाग्निपरमाणूनां जलपृथिवीपरमाणुतः पृथग्भूतत्वादाधाराभावात्स्वयमग्निपरमाणुषु रूपं विद्यमानमपि न प्रकाशते। तस्माद्रूपतन्मात्रेऽपि रूपमव्यक्तम्।

तयोरेवाभावान्नाकाशतन्मात्रे शब्दाभिव्यक्तिः ॥७॥

तयोरेव जलपृथिव्योराधारयोरभावादाकाशस्य शब्दतन्मात्रस्य, न शब्दाभिव्यक्तिः। शब्दव्यक्तौ तु आघातमावश्यकम्। न चाघातः परमाणुतामाप्तयोः स्पर्शरहितयोः पृथिवीजलयोस्तदा। तस्मादव्यक्तः।

संघाताभावान्न वायुतन्मात्रे स्पर्शो व्यज्यते ॥८॥

तथा च संघाताभावान्न वायुपरमाणुषु स्पर्शो व्यक्तः जलपृथिव्योः प्रतिबन्धकयोरभावाद्वायोर्वेगाभावाच्च।

आत्मवत्ते निराकाराः ॥९॥

अतस्ते परमाणवः आत्मवन्निराकारा अव्यक्ताः। अत एवाऽणुश्यामतासिद्धान्तो गौतमाभिमतोऽयुक्तः, रूपाभावात्।

तदेव शून्यं बुद्धस्य ॥१०॥

एषा स्थितिरेव भगवतो बुद्धस्याभिमतं शून्यं वक्तुं शक्यते।

एतदेव मिथ्यात्वं शंकरस्य ॥११॥

एतदेव शङ्कराचार्यस्य मिथ्यात्वं वक्तुं शक्यते।

गन्धरसरूपस्पर्शशब्दशैत्यौष्ण्यकाठिन्यमार्दवपरिधीनां सत्त्वेऽप्यव्यक्तत्वात्किमभावाच्छून्याद्वाऽतिरिक्तं वदेत् ॥१२॥

पञ्चमहाभूतानां परमाणवो गन्धरसरूपस्पर्शशब्दशैत्यौष्ण्यकाठिन्यमार्दवपारिमाण्डल्यानामव्यक्तत्वात् प्रलयकालेऽव्यक्ताः। तस्माच्छून्यादभावाद्वातिरिक्तं किं वदेदिति साधुर्बुद्धः शङ्कराचार्यश्चात्र।

शून्याज्जातं शून्यञ्च प्रलये ॥१३॥

अतः शून्यादेवेदं जगज्जातं पुनश्च प्रलये शून्यमेव बुद्धस्य।

एकमेवाद्वितीयं ब्रह्म शङ्करस्य ॥१४॥

अतः सर्वेषां निराकारपरमाणुरूपत्वात् जीवानां परमाणूनाञ्च ब्रह्मणि अव्यक्ततयाऽवस्थानात् एकं खल्विदं ब्रह्म। तदा परिध्यभावात्

सीमाभावाद् भेदाभावाच्च सरःसरित्सागराणां मिश्रितजलमिवैकं प्रतिभाति ।

तस्मादेकोऽहं बहुस्यामिति औदनिषदी प्रक्रिया ।।१५।।

तस्मादेव कारणात् वेदान्तस्येयं प्रक्रिया, एकोऽहं बहुधा नानानामरूपात्मको भवानीति ब्रह्म-संकल्पः । यद्यपि ब्रह्मण एतादृशीच्छा भूतेति न कोऽपि जानाति तथा चैकोऽहमित्यपि न वक्तुं योग्यं तथापि ब्रह्म स्वयमात्मनि त्वनुभवत्येवैकोऽहमिति सर्वमनुमीयते केवलम् ।

अनिर्वचनीयमेवैकमिति भेदशून्यत्वात्तत्रसंख्याया अभावात् ।।१६।।

यस्य परिधिः यस्य सीमा तत्रैवैकं द्वे बहूनि वा भेदाद् वक्तुं शक्यते । ब्रह्मणो बृहत्तमत्वात्सीमाभावादेकमिति भेदबुद्धिर्न युक्ता, तस्मादनिर्वचनीयमेव ब्रह्म । पुनरपि भेदशून्यत्वरूपमेकत्वमुच्यते । ब्रह्मणि निर्गुणे गुणरूपाया एकत्वसंख्याया अभावात् ।

एषैवाव्यक्तं कपिलस्य ।।१७।।

एषा तन्मात्राख्यपरमाणुरूपा प्रकृतिरेव कपिलस्य सांख्याचार्यस्यानुमीयमानमव्यक्तम् । यन्न निर्वक्तुं शक्यमनिर्वचनीयञ्चेति भावः ।

यच्छून्यं न सर्वथाशून्यं तत्त्वं हि तत् ।।१८।।

यद्धि शून्यं तन्न सर्वथाभावरूपं शून्यमपि तु तत्त्वं तत् । यथा च बौद्धानामप्यभिमतम् । तदुक्तं गौडपादैः—

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका जगुः ।।

अनिर्वचनीयमिति ।

व्यक्ताकाररराहित्याच्छून्यं न वस्तुतः ।।१९।।

यतो हि पञ्चमहाभूतानां यद्यत्स्वरूपं व्यवहारिकं दृश्यते तस्य सर्वस्याव्यक्तत्वेनाभावत्वं शून्यत्वञ्च प्रलये जायते, न तु वस्तुतः

शून्यत्वमभावो वा जायते। परमाणुर्यद्वस्तु तस्य वस्तुतो वा तत्त्वतोऽभावो न भवतीत्यर्थः सत्त्वात्। यत्तु व्यवहारतः सत् वस्तुतो मिथ्येति शंकरः, तन्न युक्तम्।

असतः सदनुत्पत्तेश्चेतनानुत्पत्तेश्च ॥२०॥

यतो हि न कदापि असतः सदुत्पत्तिः, नापि चेतनादचेतनोत्पत्तिः सम्भवति, अयोग्यत्वात् कार्यकारणयोः सादृश्यदर्शनात्।

उपादानग्रहणात् ॥२१॥

न हि चेतनादचेतनं जगदुत्पद्यते। यदि हि चेतनादचेतनमुत्पद्येत तदा कुम्भकारादेव घटसमुत्पत्तिः स्यात्तदा कुम्भकारस्य कुम्भोत्पादनाय मृत्तिकारूपोपादानग्रहणप्रयासोऽनुपपन्नः स्यात्। तस्मान्न जडस्य ज्ञानरहितस्य जगतश्चेतनं ब्रह्मोपादानं भवितुं शक्यते।

तस्मान्न स्वरूपशून्यं वस्तुतः किन्त्वव्यक्तम् ॥२२॥

तस्मादाकारतः शून्यं सर्वं न तु वस्तुतः। सर्वे परमाणवः सन्तः आत्मवन्निराकाराः।

तेऽसंख्या अनश्वराश्चात्मवत् ॥२३॥

ते परमाणवोऽसंख्या अनश्वराश्च भवन्तीति यथा जीवात्मानोऽसंख्या अनश्वराश्च।

असंख्यगुणाश्च ते जीवेभ्यः शरीरकारणत्वात् ॥२४॥

ते च परमाणवो जीवेभ्योऽसंख्यगुणाः सन्ति। कस्मात्? शरीराणां कारणत्वात्। यावन्तः शरीरिणः सन्ति तावन्ति शरीराणि निर्मातुं क्षमा च प्रकृतिः। न चैकपरमाणूपादानकं किमपि शरीरं भवति। एकस्यापि शरीरस्यासंख्यपरमाणूपादानकत्वादसंख्यगुणास्ते जीवेभ्यः। जीवो हि शरीरीत्युच्यते।

जडत्वचेतनत्वाभ्यामुभयोर्भेदः ॥ २५॥

तत्र प्रलये, ब्रह्मणि, अव्यक्ततयावस्थितेषु परमाणुषु जीवेषु चानश्वरेषु कोऽपि भेदोऽस्ति न वेति प्रश्ने उच्यते, परमाणवो जडाः, आत्मानश्चेतनाः। ज्ञानहीनो जडः।

महत्त्वञ्चात्मनि ॥२६॥

आत्मनि महत्त्वञ्चाणुत्वञ्चोभयम् । य आत्मा योनिसम्बन्धात् परमसूक्ष्मकीटेषु वसति स एव कदाचित् हस्त्यादिषु महामीनेषु च । स तु शरीरं योजननिभं व्याप्नोति इति तस्य महत्त्वं शरीरपरिच्छिन्नस्यापि । न च महत्त्वं परमाणौ किन्तु परमाणुत्वमेव इत्यपि भेदः ।

सूक्ष्मत्वस्थूलत्वाभ्याञ्च भेदः ॥२७॥

आत्मा सूक्ष्मः परमाणुः स्थूलः । तेन सूक्ष्मत्वस्थूलत्वाभ्याञ्च भेदोऽस्ति ।

अल्पशक्त्यल्पज्ञानाश्रया जीवाः ॥२८॥

तत्र जीवाः अल्पशक्तयः अल्पज्ञानाश्च भवन्ति इति जीवानां ब्रह्मणो भेदः ।

तेऽप्यसंख्या अनश्वराश्चापि ॥२९॥

ते जीवात्मानोऽसंख्या अनश्वराश्च भवन्ति । प्रतिशरीरं भिन्नत्वात् । समानकाल एव द्वन्द्वानां दर्शनात् ।

अनन्तशक्त्यनन्तज्ञानाश्रयं हि ब्रह्म ॥३०॥

ब्रह्म तु सर्वशक्तिमत्सर्वज्ञञ्चेति जीवेभ्यो भेदः ।

न तत्समष्टिरसम्भवान्नित्यशुद्धबुद्धमुक्तस्वभावाच्च ॥३१॥

न हि अल्पज्ञानां जीवानां समष्टिः सर्वज्ञं ब्रह्म सम्भवति । यत्तु वृक्षाणां व्यष्टीनां समष्टिर्वनमिव जीवानां व्यष्टीनां समष्टिर्ब्रह्म तन्न । यतो हि वनमिति कल्पनामात्रम् । कथम् ? छिन्नेषु सर्वेषु वृक्षेषु एकैकं कृत्वा न किञ्चिदपि वनमस्ति । उत तु बद्धेष्वपि सर्वेषु जीवेषु दुःखितेषु ब्रह्म नित्यं सच्चिदानन्दशुद्धबुद्धमुक्तस्वभाव इति निरस्तमद्वैतम् । नापि मुक्तानां मुक्तौ ब्रह्मरूपतामापन्नानां तेषां समष्टिर्ब्रह्म, असम्भवात् । एकदेशित्वासर्वव्यापकत्वदोषापत्तिश्च बद्धानां पार्थक्यात् ।

जडैव प्रकृतिः ॥३२॥

प्रकृतिस्तु जडा केवला । सैव मायोच्यतेऽव्यक्ता परमाणुरूपा सती ।

सत्यं तत्त्रिकमनाद्यनन्तं गौतमस्य ॥३३॥

ब्रह्म जीवः प्रकृतिरिति त्रिकमनाद्यनन्तमिति गौतमस्य मतं सत्यम् ।

प्रलये तद्भेदोऽवितर्क्योऽविज्ञेयोऽलक्षणश्च ॥३४॥

ब्रह्मजीवप्रकृतीनां भेदस्तु प्रलये यतोऽलक्षणोऽलिङ्गोऽतोऽवितर्क्योऽविज्ञेयश्च । सर्वकार्याणां प्रलये परमाणूनां निराकारत्वाद् ब्रह्मणि अव्यक्ततयावस्थाने तद्भेदोऽवितर्क्योऽविज्ञेयोऽलक्षणश्च भवति । तस्मादेकं ब्रह्माद्वितीयं निराकारम् । यथा च मनुः—

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥

तमोभूतन्तु तेजसो लयात् प्रकाशाभावादिति ज्ञेयम् न च यथा सृष्टिः प्रकाशते तथा प्रलयेऽपि । यत्तु ब्रह्मप्रकाशमङ्गवति तथा च लये ब्रह्मरूपत्वात्सर्वं प्रकाशमयमेव स्यान्नतु तमोभूतमित्युच्यते, तन्न ब्रह्मप्रकाशस्य तेजोविलक्षणत्वाज्ज्ञानमेव ब्रह्मणः प्रकाशोऽभौतिकः, तस्मात्तमोभूतमदृश्यमिति मनोरुक्तिर्युक्ता । तथा च "तम आसीत्तमसा गूढमग्रे" इति श्रुतिः । सम्भवति च सूर्यस्य प्रलयेऽभावात्तदानीं परमाणुरूपेणावस्थितस्य जगतस्तमसा गूढत्वम्, महातमस्त्वमित्यर्थः ।

सर्गे जलपृथिव्यौ मूढत्वात्तमः ॥३५॥

सर्गे हि जलपृथिव्यौ मूढे उच्येते, तस्मात्तम इति ।

वाय्वग्नी चञ्चलत्वाद्रजः ॥३६॥

तथा च वायुरग्निश्च चञ्चलत्वाद् रजः । वायुर्हि गतिमान्, अग्निरपि चोर्ध्वगतिकः, तस्माच्चलौ ।

तदुभयाभावात्सत्त्वमाकाशम् ॥३७॥

यतश्चाकाशे तयोरुभयोर्मूढत्वचलत्वयोरभावः । तस्मात्सत्त्वमाकाशम् । तत्राकाशे मूढत्वाभावोऽगुरुत्वात्, चलत्वाभावस्तु प्रत्यक्ष एव ।

सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरिति कपिलः साधुः ॥३८॥

तेषां पञ्चभूतानां सत्त्वरजस्तमसामव्यक्तशब्दस्पर्शरूपरसगन्धशैत्योष्ण्यकाठिन्यमार्दवस्नेहपरिधीनां समानत्वं प्राप्तानां साम्यावस्थया प्रकृतिरिति साधुरत्र कपिलमुनिः । बुद्धिरहंकारश्चात्मगुणत्वान्न साम्प्रतं सांख्योक्तम् । अथवा ब्रह्मणः सृष्टिसंकल्प एव बुद्धिर्मनो वा ततोऽहंकारसम्भूतिरिति वक्तुं शक्यते । तदापि आत्मन एव न प्रकृतेस्ताविति भावः । यत्तु समाधिसुषुप्तिदशायां न जगदनुभवः किन्तु स्वप्नजाग्रदवस्थायामेवाहंभावत्वादेवानुभवस्तस्मादहंकारस्यानुमानं तथा चाहंकारात् पञ्चतन्मात्राणामुत्पत्तिरिति तन्न, प्रदीपवत्प्रकाशक एवाहंकारो नोत्पादकः ।

तदलं परिश्रमेण वैज्ञानिकानां तत्प्राप्तयेऽव्यक्तत्वात् ॥३९॥

तस्माद्वैज्ञानिकानां परमाणून्प्राप्तुं परिश्रमो वृथैव । न हि यन्त्रलभ्यास्तेऽव्यक्तत्वात् । अणुपर्यन्तन्तु प्राप्तुं शक्यन्ते व्यक्तत्वात् ।

तदुत्पन्ने जगति पृथिवीलोके जम्बूद्वीपे भारतखण्डे आर्यावर्त्तेऽवधप्रदेशे बालार्कमण्डले सरयूतटे महिषीग्रामे वैक्रमाब्दे विंशतिशताब्धामन्तिमे चरणे चित्रगुप्तगोत्रे श्रीप्यारेलालाद्धर्मनिरतात् पेंशनदेवीगर्भोत्पन्नेन अवधप्रदेशीयबलियामण्डलान्तर्गतछाताख्यग्रामवासिनो विप्रकुलभूषणस्य सर्ववेदाङ्गषड्दर्शनसाहित्यपुराणादिसर्वशास्त्रविशारदस्य काशिकविद्वत्कुलसुपूजि-

तस्य वाराणसेयसंस्कृतविश्वविद्यालयवेदान्तविभागाध्यक्षस्य प्रातःस्मरणीयस्य पूज्यपाच्छ्रीरघुनाथशर्मपाण्डेयस्य, व्याकरणविभागाध्यक्ष पूज्यश्रीमुरलीधरमिश्रस्य, सर्वदर्शनविभागाध्यक्षश्रीदेवाचार्यस्य, प्राच्यविद्याप्रतिष्ठानाध्यक्षश्रीयुधिष्ठिरमीमांसकस्य, वाराणसेयाजुर्वेदमहाविद्यालयप्रधानाचार्यश्रीलालचन्द्रवैद्यस्य, बालार्कसंस्कृतायुर्वेदमहाविद्यालयप्रधानाचार्यश्रीपूज्यपण्डितराजारामशास्त्रिणो मरौंचाऽग्घरवानिवासिनः प्रथमगुरोश्च शिष्येण सांख्ययोगव्याकरणायुर्वेदाचार्येण राजकीयायुर्वेदचिकित्सालयचिकित्साधिकारिणा भूतपूर्वसार्वभौमसंस्कृतमहाविद्यालयझांसीप्रधानाचार्येण मयाऽकिञ्चनेन जगदीशेन शताब्द्यामेकविंश्यां प्रथमचरणे तीर्थराजे नैमिषारण्ये गोमतीतटे श्रीनारदानन्दाश्रमे सरस्वतीसरोवरे महाध्यानप्रयासेन विरचितं परमाणुदर्शनमिदम् ॥४०॥

तदुत्पन्ने परमाणुभ्य उत्पन्ने जगतीति जन्मस्थानादिपरिचायकं सूत्रम् । तथा च कृतिस्थानमपि पुराणलब्धप्रतिष्ठं दर्शितम् । तत्र सर्वशास्त्रपारंगतत्वाच्छ्रीरघुनाथशर्मा प्रमुखो गुरुः । नारदानन्दस्तु महातापसः योजनपरिमण्डलविस्तृतस्तस्याश्रमो ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासिभिः शतैः सुशोभितः कण्वजाबाल्याश्रमनिभस्तन्मध्यवर्ति च विमलजलापूर्यमाणं ससोपानञ्चतुष्कोणाकारं चतुर्दिक् द्वादशमासिकहरिततृणनानावर्णपुष्पलतागुल्मपरिवृतमनोज्ञमन्दिरयज्ञशाला--दिभिरनेकैः परितः सुशोभितं सायंप्रातः सन्ध्योपासकैः सत्सङ्गिभिश्च निशेवितं सरस्वतीसरोवरं तस्य तटे विचारनिमग्ने मया जगदीशेन विरचितमिदं परमाणुदर्शनम् ।

इति परमाणुदर्शनं गायत्रीभाष्यमहाभाष्योभयोपेतं द्वासप्तत्युत्तर-
शतद्वयसूत्रात्मकं समाप्तं समाप्तम् ॥४१॥

इदं परमाणुदर्शनं स्वभाष्योपेतं सप्तमाध्याये महाभाष्योपेतञ्च समाप्तम्। सूत्रानर्थवारणाय गायत्रीभाष्योपेतमिति भावः। गायत्रीतिनाम्नी मे जाया, तन्नाम्ना संज्ञितं भाष्यम्। दर्शनमिदं द्वासप्तत्युत्तरशतद्वयसूत्रात्मकमिति ज्ञेयम्। सहैतेनापि संख्यानिर्देशकेन सूत्रेणेति। तत्र प्रत्यध्यायं क्रमशो द्वासप्ततिचत्वारिंशदूनपञ्चाशद्द्वादशैकविंशतिषट्त्रिंशदेकैकचत्वारिंशदिति सूत्राणि सन्तीति विस्तरः।

इति जगदीशविरचिते परमाणुदर्शने

चतुर्थ पादे द्वितीयोऽध्यायः पादश्च समाप्तः।

यानि मे साधूनि मतानि तानि युष्माभिर्मन्तव्यानि, नो इतराणि।

यानि मे सुविचारितानि तानि युष्माभिर्मन्तव्यानि, नो इतराणि नो इतराणि।

इति पुष्करतीर्थक्षेत्रीयविरञ्च्यावासग्रामाभिजनस्य वाराणसेयपाणिनिमहाविद्यालयप्राचार्यस्य भारद्वाजगोत्रस्य विद्वत्कुलपूजितस्य चतुर्दिग्लब्धकीर्तेरनवरतज्ञानोदधिनिमज्जनगृहीतनानामूल्यरत्नस्य युधिष्ठिरमीमांसकाचार्यस्य, वाराणसेयसंस्कृतविश्वविद्यालयवेदान्तविभागाध्यक्षसर्वशास्त्रविशारदस्य नानादेशागतान्तेवासिसहस्रप्रणमन्मूर्धालंकृतपादपङ्कजस्य बालेयाजनपदीयच्छाताग्रामनिवासिनः श्रीरघुनाथशर्मणो, व्याकरणविभागाध्यक्षविद्वच्छिरोमणिपण्डितवरेण्यस्य गोरक्ष-

पुरनिवासिन आचार्यमुरलीधरमिश्रस्य, पाञ्चालप्रदेशीयरोपड़मण्डलान्तर्गतचूर्णियांग्रामवासिनो वाराणसेयाजुर्नायुर्वेदमहाविद्यालयप्राचार्यस्य श्रीलालचन्द्रवैद्यस्य च शिष्येण सांख्य-योग-व्याकरणायुर्वेदाचार्येण वाराणसेयसंस्कृतविश्वविद्यालयस्नातकेन बालार्कजनपदोयहिमगिर्युपत्यकाप्रसिञ्चनपटुसरयूतटसमुल्लसन्महिषीग्रामवासिना चित्रगुप्तगोत्रोत्पन्नेन पेंशनगर्भजेनपरमाणुदर्शनादिनानाग्रन्थकारेणोत्तरप्रदेशराजकीयचिकित्साधिकारिणा **जगदीशाचार्येण** प्रणीतम् इदं

परमाणु–दर्शनं पूर्तिमागात् ।

शुभं भवतु लेखपाठकानाम् ।

कल्याणं भवतु परमाणुज्ञानम् अधिजिगमिषूनाम् ।

इति परमाणुदर्शनम् समाप्तम्

संशोधनं परिष्करणं च

पृष्ठ	पं०	संशोधनादिकम्
४	१६, १७	१८ तमं सूत्रमेवं पठनीयम्—"सूक्ष्मेन्द्रियमपि तदुपलब्धावसमर्थमनात्मत्वादनात्मगुणत्वादनात्मगुणगोचरत्वाच्च ॥१८॥"
५	१०	संशोधनीयम्— "…सर्गप्रवृत्तिर्भोगाय…"
६	६	संशोधनीयं— '…रूपतन्मात्र-रसतन्मात्र-गन्धतन्मात्र इति…'
१२	१०	दयानन्दतर्कास्तु परमगम्भीराः—इत्यतोग्रे वर्धनीयम् "शंकरमतानुसारेण तु नित्यशुद्धबुद्धमुक्तस्वभाववद्ब्रह्मैव केवलम् । तत्र यदा तादृगपि ब्रह्म स्वोपाधिवशाद् बन्धमुपयाति नानानामरूपात्मकं भूत्वा तदा जीववादिनां मते निश्चितमोक्षकालानन्तरं पुनर्जन्ममरणचक्रोपसर्पणसिद्धान्ते का बाधा? नेत्यर्थः । तस्मात् साध्वेव दयानन्दमतमत्र ।
१४	१२	'ते न' इत्यस्थस्थाने 'तेन' इति पठनीयम् ।
१६	१	'यथोग्नौ रूपौष्ण्यगुणौ' इत्यस्य स्थाने 'यथाग्नौ रूपं गुणो' इति पठनीयम् ।
२५	१५	'अण्डं वेत्युक्तः ।' इत्यतोऽग्रे 'हिरण्यं भूतलं, हिरण्या पृथिवी, सा गर्भे यस्यासौ हिरण्यगर्भः कर्दमीभूतं जलमेव तत् ।
३०	१०	अतोऽग्रे ३४, ३५, ३६, ३७ संख्यकानां सूत्राणां भाष्यमग्रे मुद्रितपाठानुसारं पठनीयम्—

तदन्तराकाशपर्यन्तानि स्रोतांस्युपवेदोक्तानि दोषधातुमल-गमनागमनमार्गाः ॥३४॥

संहननक्रियाद्वारा संहतानामेवैषां पञ्चमहाभूतानां संहताणुद्वयोर्मध्ये येऽन्तराकाशास्तेऽपि आयुर्वेदोक्तानि स्रोतांसि परमसूक्ष्माणि। ये खलु दोषा धातुमलानां गमनागमनमार्गाः। दोषाः वातपित्तकफाः। धातवस्तावद् रसरक्तमांसमेदोस्थिमज्जाशुक्राः सप्त। मलास्तावन्मूत्रपुरीषान्यदुष्टभावाश्च। तत्र पोषकतत्त्वानां परिणाममापद्यमानानां सूक्ष्माणुपर्यन्ताभिसरणप्रणाल्यस्त एवान्तराकाशाः परमसूक्ष्माभिसरणमार्गाः। तैरेव प्रदुष्टभावाः मलीभूता बहिर्निःसरन्ति इति मानवपिण्डस्रोतोनिर्देशो ज्ञेयः। नात्र महास्रोतसां विषये निर्देशः सुस्पष्टत्वादन्यत्र। तस्मादेव स्रोतोवैगुण्यं खवैगुण्यमिति पर्यायेणोच्यत आयुर्वेदे। तथैव चतुर्विधेष्वपि पिण्डजाण्डजस्वेदजोद्भिज्जेषु ज्ञेयानि। निर्जीवापि सृष्टिस्तथैव।

इति सामान्येन निर्देशस्तदर्थाकृतिकल्पना च ॥३५॥

इति पृथिव्यप्तेजोवाय्वाकाशादीनां पञ्चमहाभूतानां विशुद्धानां हि सामान्येन संहननिर्देश उक्तो वेदितव्यः। निर्देशार्था एव परमाणूनामाकृतिकल्पना कृता केवला। एषामणूनां प्रलयात् पूर्वं विघटनं न भवति। एत एव सूक्ष्माणव उच्यन्ते, प्रथमविकृतयश्च। तथा चैते एव सृष्टावन्तिमतत्त्वानि चरमतत्त्वानि वोच्यन्ते। भवन्ति च त एव।

एषामेव क्रमनानात्वे संख्यान्यूनाधिक्ये च पदार्थभेदाः ॥३६॥

संहननक्रियाद्वारा संहतमहाभूतानामेषामेव सूक्ष्माणूनां नानाक्रमरूपात् कारणात्तेषां सजातीयानां सूक्ष्माणूनां संख्यान्यूनाधिकत्वेन च नाना पदार्थानामुत्पत्तिः। यथा काष्ठादिषु वाय्वाकाशसूक्ष्माणुबाहुल्यात्तदपेक्षयान्यसूक्ष्माणुसंख्यान्यूनत्वात्सुषिराधिक्यं तेन लघुत्वं जलपृथिवीसूक्ष्माणूनां संख्यान्यूनत्वाद् गुरुत्वहानिः। आकाशवायुसूक्ष्माणूनां न्यूनत्वेऽग्निसूक्ष्माणूनामाधिक्ये च संजाते स्वर्णताम्रादीनां तैजसानामुत्पत्तिः। संख्याधिक्येनाकर्षणाधिक्याद् गुरुत्वाधिक्यम्। तत्र योऽग्नेः सूक्ष्माणुः स सप्तविधरूपत्वात्सप्तविधः। यथा क्रमशः कपिशश्यावनीलहरितपीतपाटलरक्ताः, प्रकाशाभावात्तम इव सर्ववर्णाभा-

वात्क्रृष्ण: सर्वसममिश्रणाच्छ्वेतो यथा सूर्ये । तत्र पीतसूक्ष्माणूनां संयोगात्स्वर्णपीतपुष्पपर्णकाष्ठादिनामुत्पत्तिः । रक्तैस्ताम्ररक्तपुष्पादीनामुत्पत्तिः । तथा चान्यत्रापि तत्तद्वर्णवस्तुविषये ज्ञेयम् । तथा च जलसूक्ष्माणूनामाधिक्याद् द्रवाणामुत्पत्तिः । जलाग्निसूक्ष्माणूनामाधिक्येन स्नेहानां स्नेहद्रव्याणाञ्च तत्तद्वर्णानां सर्षपानाम्, तेन तेषां ज्वलनं प्रदीपादिषु सम्भवति । पृथिवीवह्निसूक्ष्माण्वाधिक्येन चकमकादिप्रस्तरस्यारणिवृक्षादीनाञ्चोत्पत्तिर्येषामत्यल्पसंघर्षादेव ज्वाला प्रजायते । येन वनपर्वतादिषु दावानल इति प्रसिद्धः । तथैवान्येष्वपि द्रव्येषु विवेकिभिर्ज्ञेयम् । तस्मात्क्रमभेद एव पदार्थभेदकारकः । तेन पञ्चतत्त्वसिद्धान्तो यद्वेदोक्तो गौतमादिभिश्चोद्घोषितः न तस्य हानिः । यथा च प्राधान्येन तृतीयसूत्रे ध्वनितम् ।

एष्वेव पञ्चसु नव्यभौतिकवैज्ञानिकैर्विश्लेषितानां शताधिकतत्त्वानामन्तर्भावः ॥३७॥

एष्वेव पञ्चसु महाभूतेषु क्षित्यप्तेजोमरुद्व्योमसु आधुनिकभौतिकवैज्ञानिकैर्विश्लिष्य विश्लिष्य प्रमाणितानां शताधिकतत्त्वानामन्तर्भावः पूर्णरूपेण भवति । न चैतानि शताधिकानि तत्त्वानि सन्ति । अपि तु पूर्वोक्तप्रकारेण सूक्ष्माणूनां क्रमभेदात्ते नाना पदार्था एवेति मे मतिः, संख्यावत् सर्वेषां कठिनपदार्थानां पृथिवीतत्त्वेऽन्तर्भावः पार्थिवत्त्वात् । सर्वेषां तरलानामौदकत्त्वाज्जलेऽन्तर्भावः । सर्वेषां वाष्पाणां वायव्यत्वात् वायान्तर्भावः । विद्युदिति शक्त्याख्यमग्नितत्त्वम्, एषां चतुर्णां स्थितिक्रियाधारः शब्दाश्रयश्च पञ्चममाकाशतत्त्वम् । यः कश्चिदपि नास्तिकः सर्वथैवाविचारयन् यदि प्राच्यवेदमतं खण्डयति निन्दनीयोऽस्ति सः ।

— — — —